नं: ६१-घ

वैयाकरणसिद्धान्त रत्नाकरः

कृदन्त प्रक्रिया पत्राणि-६६

© Dharmartha Trust J&K. Digitized by eGangotri

नं॰ ६१ - घ
वैयाकरणसिद्धान्त रत्नाकरः
कृदन्त प्रक्रिया
पत्राणि ६८

वैयाकरणसिद्धान्तरत्नाकरः

कृदन्तप्रक्रिया

पत्राणि ६८

५८

६८ पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ६१-घ
वैयाकरणसिद्धान्तरत्नाकरः
कृदन्तप्रक्रिया
पत्राणि ६८

© Dharmartha Trust J&K. Digitized by eGangotri

ॐ १२ ॐ

॥सिद्धांतरत्नाकरे रुद्रं तस्यपुस्तकं॥



© Dharmartha Trust J&K. Digitized by eGangotri

॥सि.र.कृ॥

॥१॥

1

श्रीगणेशाय नमः। ॐ नमः सवित्रे। वेंकटेशो विजयतेतराम्॥ जायतां प्रकृतिः सा मामनेकानेकशक्तिका। यन्नक्ति
शब्दरूपाणि सांनिध्यात्सृजत्ययत्नतया॥१॥ गोपीपीनकुचद्वंद्वसंगादानंदसुंदरा। यं त्वां दर्शयिमे श्रीशाआवष्टे सकृतीकृ
तः॥२॥ अर्थप्रत्यायनाय प्रयुज्यमानशब्दानुशासनं न क्वचित्पदानुशासनपूर्वकमिति सुप्तिङंतं पदमित्यारं(?)भः॥ ध्य
न तत्क्रमानुरोधेन तदुभयं निरूपयत्सु पाकल्लादीनां च प्रकृतित्वेनापेक्षितानां कृत्तान्वकुमारभते धातोरिति। अत्र कश्चि दं
त्॥ आग्लादेशाद्धात्वधिकारेण त्वात्ततीयसमाप्तेरिसा(?)॥ अन्यथा एधते इत्यादौ विकरणोर्मविधानात्ट्टेरेत्वं न स्यात् एशः
शित्वं सर्वादेशार्थं कर्त्तव्यं स्यात् इतरथा स्यादेः परस्य त्यादेरेत्वे ह्ययोरेकारयोः श्रवणप्रसंगात्। मन्मते तु एकारस्यैकार
वचनेप्रयोजनाभावादंत्येनापि शित्वं सर्वादेशः सिध्यतीति लाघवं। किं च लिंत्वाडि-तः इतश्च तस्य स्थपिपातांतेना
मः लिडः सीयुट याग्नुट् परस्मैपदेष्वित्यादावपि विकरणोर्मविहितत्वाद्दोष एव॥ तस्माद्धाद्य एव पक्षो युक्त इति चेन्नैतस्माह॥
आन्तृतीयसमाप्तेरित्यादिना। अत्र च लिंगमेशः शित्वमेव। लक्ष्यविरोधे लाघवस्याप्रयोजकत्वात्। आद्यपक्षे आर्द्धधा
तुकसंज्ञायां धातुग्रहणाभावाद्वृक्षत्वं वृक्षतेत्यादावपि प्रसंगः। तन्निवृत्तये तत्र धातुग्रहणं कर्त्तव्यं स्यान्महद्गौरवं॥ ॥१॥

© Dharmartha Trust J&K. Digitized by eGangotri

किंच पेचयूयं वक्रयूयमित्यत्र थस्य अकारः श्वित्कर्त्तव्यः स्यात्॥ अकारस्याकारविधिः समसंख्यार्थः स्यात्। सिद्धांते
तु आदेः परस्येत्यादेरकारे कृते द्वयोरकारयोः पररूपेणेष्टसिद्धिः॥ एत्वादिविधौ विहितविशेषणात्र कश्चिद्दोषः। न
चैवमपि लूभ्यां लूभ्यामित्यादावपि टप्रसंगः॥ धातोः परत्वाद्धल्कृतो विहितत्वाच्च भ्यामादेरिति वाच्यं॥ धातोरित्यस्याहत्या
ज्ञामिधातोरित्यतो धातोरित्यनुवर्त्तनाद्वा धातोरित्युच्चार्य विहितानामेवार्धधातुकसंज्ञा[illegible]विधानात्॥ स्यादेतत्॥ सूत्र
मिदं मास्तु॥ न च प्रातिपदिके प्रसक्ता मदादयः श्रूंक्याः॥ विशेषविहितैः स्वादिभिर्बाधात्॥ किंच प्रकृत्युपस्थापनांतरंगक्रि
यापेक्षयाये कर्तृकर्मणी न तैर्वक्तुमदादयो भवंति। न चाष्टांतरवाच्यबहिरंगक्रियाकर्तृकर्मणोः॥ द्वितीयादयस्तु ह
र्ष्यंपश्येत्यादौ प्रातिपदिकादेव विधीयमाना बहिरंगक्रियासाधनमेव वदंतो नाङ्भवंति॥ तस्माद्व्यर्थमिदं सूत्रमिति चेन्न॥
अंगसंज्ञायां धात्वधिकारस्योपयुक्तत्वात्॥ कृदुपपदसंज्ञे अपि प्रयोजने भवतः। संन्निहिते धात्वधिकारे येप्रत्ययास्ते
कृत्संज्ञास्तत्रैव तस्मिन्धात्वधिकारे यत्सप्तम्यानिर्दिष्टं तदुपपदसंज्ञं भवतीति॥ कृदुपपदसंज्ञासूत्रयोरुत्तरत्राधिका
राभ्युपगमान्नेदं प्रयोजनमिति [illegible] सूत्रं केवलमंगसंज्ञार्थमेवेति स्थितं। नदपि प्रत्याख्यातं भाष्ये॥ धातुग्रहणम

दृ

© Dharmartha Trust J&K. Digitized by eGangotri

॥२॥ नर्थकं पङ्क्तिधोधात्वधिकारादिति सर्वाधिकारोऽवरूपांगी कार्यः करिष्यतिहरिष्यतीत्यादावंगसंज्ञार्थमिति दिक् ॥
2 तत्रोपपदंमहत्वाः संज्ञाया अन्वर्थत्वान्महान्तं कुंभं करोतीत्यत्रनोपपदसंज्ञा ॥ यद्यत्रोपोच्चारितं तत्पदं ॥ यच्चोपपदं न तदु
पोच्चारीति । यदा तु महाकुंभं करोतीति विग्रहस्तदा महाकुंभकार इति भवत्येव इह त्वा कुंभं कुंभं करोतीति कुंभी
करोति मृदमित्यत्रापि न भवति । प्रकृतिविकृत्योरभेदविवक्षायां प्रकृतिवाचकाद्द्वितीया विधीयते । तत्र विकृतेः प्र
कृतिसापेक्षत्वात्सापेक्षमसमर्थं भवतीत्यसामर्थ्यात् ॥ उपपदसंज्ञायामविधोव समर्थपरिभाषोपस्थितेर्नि
र्विषादत्वात् । काष्ठान्कटीकरोति काष्ठकटीकार इति तु भाष्यकारेष्ट्या भवत्येव । शिष्टं सर्वं प्रागेव व्याख्यातं ॥ कृद
तिङ् ॥ इहाऽतिङ् ग्रहणाच्छाक्यमकर्तुं । न वैवं पठतीति भवतीत्यादौ प्रातिपदिकत्वापत्तिः ॥ इष्टापत्तेः । तिङैवैकत्वा
दिसंख्याया अभिधानात्स्वादीनामनुत्पत्तेः । न वैकः द्वावित्यत्रेव साधुत्वार्थास्स्वाद्युत्पत्तिः शंक्या । तिङन्तत्वात्पद
त्वेनैव साधुत्वोपपत्तेः । अन एव अपदं न प्रयुंजीतेति निषेधाप्रवृत्तेः ॥ क्वचित्पदस्यापि गवित्ययमाह इत्यादौ राम
साधुत्वं सूत्रे भाष्यादिप्रामाण्यात्स्वीकार्यमित्युक्तं सूत्रायामित्यत्रेति बोध्यं । तिङन्तोपस्थाप्यप्रक्रियाया स्त्रीत्वेन ॥२॥

© Dharmartha Trust J&K. Digitized by eGangotri

बा

योगाभावान्नटोदयः ॥ अपत्येन योगाभावान्नेति ङ्. नादरणादयः ॥ अतिशायनेन तमबिष्ठनौ नेति ङ्. श्चेत्यनेनन नति हं नादरणा

दयइति ज्ञापनाच्चेत्याकरः । वक्रूतक्तवतू ङं नानोञ्ज्ञा ङ्ति पादिकत्वं कृत्संज्ञेवबाति ङानेतिनेनज्ञापपन् इत्यपि सुवचं ॥ नचै

वं पचतीत्यादौ कस्यापि नौ तिन्नुकृशंक्याः ॥ धात्वादेः षः सः इत्यतो धातोरित्यनुवृत्तेः ॥ चिकीर्षतीत्यादौ लेकादेशस्य स्थानि

वद्भावाद्धातुत्वाभावान्नेति ॥ नन्वेवमत्यपाख्यानेन युक्तं ॥ एधेरनूयजेरस्त्रित्यादौ प्रातिपदिकत्वान्नलोपापत्तेः ॥ मैवं ॥ ॐस्य

रन्निति नकारोच्चारणसामर्थ्यात् ॥ इह तर्हि यूयान्त्रवीयादित्यादौ कृधकारत्वाद्धाहोर्निस्यात् ॥ नैष दोषः ॥ सार्वधातुकप्रतिषे

धेति ङामकृदिति निषेधोनेति ज्ञापनात् ॥ प्रत्यथा विनुयात्सुनुयादित्यत्राकृदित्येव सिद्धे किं तेनेति दिक् ॥ वासरूपो ॥

परिभाषेति ॥ असरूपापवादप्रत्ययविधानमस्या लिंगं ॥ प्रतिसूत्रमुपस्थितावधिकारो यत्र लिंगं तत्रोपस्थितो परिभाषेति न

योमेदिः ॥ अस्याधिकारत्वेनास्ति फलमिति भावः ॥ अस्मिन्धात्वधिकारइति ॥ सूत्रकृन्मतमेतत् ॥ मतान्तरे त्वस्मिन्निति समर्थम् ॥

नचैवमिनः प्राचीनेष्वपिकृत्सु ण्वुल्तृचौ श्यपदुश्यमादिषु वासरूपविधिः शंक्यः ॥ णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ् । विभाषाधेट्श्व्योः

इति नोवा ॥ अक्षोन्यतरस्यामित्यादौ तत्र तत्र विकल्पग्रहणेनास्यास्तत्रानुपस्थितिज्ञापनात् ॥ असरूपइति ॥ ननु अमात्र

५

© Dharmartha Trust J&K. Digitized by eGangotri

ष्यं प्रयोगे वा उपदेशेऽवस्थायां वा नाद्यः। त्योऽपवादित्यत्र ल्युटोऽपि प्रसंगात्। नद्य नक्तादिःकारः प्रत्ययः। लुङि त्वपा
क्षीदिति सावर्ण्ये ईकारः इति प्रयोगेऽसरूपत्वात्। भ्वः पक्ष्यात्र ल्यूडपि स्यात्। न च भूतानद्यतनपरोक्षे लिङ्विषये हृश
श्वद्योर्लङ् लिङ्गिति लङ्विधानेन लादेशेऽपि वाऽसरूपविधिर्नेति ज्ञापकज्ञानोक्तदोष इति वाच्यं ग्रामणीर्ग्रामनायक इत्यादौ
क्विबादिषूत्सर्गसमावेशानापत्तेः न ह्येते क्विबादयः प्रयोगे रूपवन्तः न द्वितीयः गोदः कंबलद इत्यादौ कविषये
ऽण्णोऽपि प्रसंगात् उच्यते अस्त्व् द्वितीय एव अनुबन्धानामनेकान्तत्वे दोषाभावात् पक्षान्तरेऽपि नानुबन्धकृतमसारू
प्यमिति वचनान्न दोषः नन्वादन्तलक्षणप्रत्ययविषये ददातिदधात्योर्विभाषेति विभाषाग्रहणं त्यया विधिना ज्ञापितं अ
थवा अर्थप्रत्यायकप्रत्ययोऽत्रासरूपो विवक्षितः तादृशश्चानुबन्धरहित एव अतोऽपवादो गोद इत्यादौ तथा च कृत्तया
क्विबादिष्वपि विकारमात्रमर्थबोधकं इति प्रयोगे रूपवत्त्वाभावेऽप्यंगीकार्यं अनुबन्धविशिष्टे धातुत्वप्रत्ययत्वव्यवहा
रो भाक्त एव तथा च मुख्यासारूप्यसंभवेऽनुबन्धप्रयुक्तगौणसारूप्यग्रहणमप्रामाणिकमिति गोदः कंबलद इत्यादौ
नाण्प्रसंग इत्यनवद्यं अपवादे ति सामर्थ्यलभ्यमेतत् यद्युत्सर्गो बाधभवति अपवादोऽसरूप उत्सर्गस्य बाधक इ

© Dharmartha Trust J&K. Digitized by eGangotri

न्युक्तेवानकश्चिद्विशेषः आद्येऽप्राप्ते विभाषा द्वितीये तु प्राप्ते इति कैयटोक्तेः तथाप्यसरूपस्य विशिष्टोऽपवाद
एव न्याय्यः न तूत्सर्गः बाध्यत्वेन यावदुत्सर्गो नापेक्ष्यते तावदपवादस्य प्रवृत्तेरेवाभावात् उत्सर्गप्रवृत्तिवेलायामप
वादप्रतीक्षायाश्च नियमत्वात् स्यादेतत् वासरूपइत्येतावदुच्यते तत्र वेत्यनेन न किं भावो विकल्प्यते असरूपोपवा
दो वा भवति पक्षे न भवतीति उत बाधकत्वं विकल्प्यते उत्सर्गस्य बाधको भवति पक्षे न बाधक इति नाद्यः अपवादस
त्वे विकल्पिते तदप्रवृत्तावुत्सर्गप्रवृत्त्यनापत्तेः अपवादेनोत्सर्गे नित्यं बाधिते पश्चादपवादेऽनेन विकल्पिते पुन
रुत्सर्गप्रवृत्त्ययोगात् ततश्च एवमुक्तं तृजादय उत्सर्गाः तेषामपवादः इगुपधलक्षणः कः तत्र पक्षे विक्षिपः इति स्या
त् विक्षेप्ता विक्षेपकः विक्षेपः इति न स्यात् यथा तद्धितेऽपवादेनाणा मुक्तेऽण् न भवति किंतु दक्षस्यापत्यमिति
वाक्यमेव तथात्रकृतेपि केवलं धातोरेवानुत्पन्नप्रत्ययकस्य क्षेपणक्रियाकर्तरि प्रयोगापत्तिः न चेष्टापत्तिः ॥
तस्मार्थाभिधाने सामर्थ्याभावात् न केवलेत्यादिनिषेधाच्च नांत्यः अस्तिर्भवंतीपर इत्याये नांतरंगस्या
निषेधसंभवे बहिरंगबाधकत्वनिषेधस्यायुक्तत्वात् तस्मात्पक्षद्वयमनुपपन्नमिति चेन्न तद्धितेसविभक्ति

© Dharmartha Trust J&K. Digitized by eGangotri

४ कपदसमुदायात्मकस्य वाक्यस्य प्रयोगेन केवलेत्यादिनिषेधात्कृत्वाऽऽदृष्टांतदार्ष्टांतिकयोर्वैषम्यात् एवं च न
केवलेत्यादिनिषेधानुरोधेन बहिरंगमपि बाधकत्वेन कल्प्यते न त्वंतरंगमपवादस्तत्वमित्याशयेनाह । बाधकोऽवेति ॥
न भावबाधकत्वेपक्षे प्रतिषिद्धे उत्सर्गप्रवृत्तौ बाधकाभावादिति शेषः इत्यादयोऽपि साधव एवेति भावः ननु कथमिदं वि
यां ज्ञायते स्त्रियामभिधेये यो वा न भवति उत स्त्रियामित्यस्यैव स्वरूपस्य निषेधः स्त्रियामित्युच्यमाना ये प्रत्यया विधीयंते ते षुवा
स्वरूपेण न भवतीति नाद्यः खट्वालविनमा ऽ ह्रूपतानतव्यदादीनां नित्यं बाधः स्यात् न द्वितीयः आवकोऽत्रीयावक्कुर्वि
ति रित्यत्र कर्मण्यँ हारेण वा स्त्रियामितिण्वाक्तिनो नित्यं बाधः स्यादित्याशंक्याह स्त्र्यधिकारोक्तं विनेति स्त्रीग्रहणांश्च
यत्नेनाधिकारोऽपि न भवतीति भावः स्त्र्यधिकारविहिता ये उत्सर्गापवादास्तेष्वपवाद उत्सर्गस्य बाधको न किंतु नित्यमेव वा
त्यर्थः स्त्र्यधिकारस्य परस्तात्तु वासरूपविधिरस्त्येव तथा च ग्रामितश्चो भोक्तुं ग्रामस्यते भोक्तुमिति सिद्धं यत्न तथा विशेष
विहितेन क्त्वाप्रत्ययेन भावलकारस्य समावेशो न स्यात् तथा कालादिषु तुमुन्विधौ कालो भोक्तुं कालो भोजनस्ये
त्यपि सिध्यति न त्वेवं क्तल्युट्तुमुनः खलर्थेषु दोषः हसितं छात्रस्य शोभनं पक्षेऽव्ययपिप्राप्नोति ल्युडूहसनं छात्र ४

© Dharmartha Trust J&K. Digitized by eGangotri

स्पर्शोमनं यज्ञपित्स्यात् न तु मुन्नूरछ्रुतिमोक्तुं लिङ्लोटावपि प्राप्नुतः स्वल्द्रीषत्पानः सोमो भवता स्वलपित्स्यात् सतप्तं
अर्हे कृत्यतृचश्चेमत्र चकाराद्द्ेन विशेषविहितो लिङ् तेन सह कृत्यतृचोः समावेशः पुनः कृत्यग्रहणं न स्वाधिकारादृ
र्हे वासरूपविधिरनित्य इति ज्ञापयत इत्यदोष इति दिक् कृत्याः ण्वुलः प्रागिति अत्र चार्हे कृत्यतृचश्चेत्यत्र कृत्याश्चेति
बाध्येत तद्ग्रहणं योगापेक्षं लिङ्गं वृश्चिकृतानुबन्धात् ण्वुल् इति सूत्रेण प्रसिद्धं नयोरेव एकशब्दः साक्षात् कर्तृरपकर्षणा
२ र्थ इति हृत्स्विकृत फलानुकूलस्वार्थत्वमिति भावः नकारैकारावितौ एधितव्यमित्यत्र तौ कौरस्तित्स्वरितमिति स्वरितः ६
शेषनिघातः एधनीयमित्यत्र उपोत्तमं रितीति ईकार उदात्तः शेषनिघाते उदात्तादनुदात्तस्य स्वरितः वसेस्तव्यदिति
एतद्वचसूत्रजं वास्तव्यमिति वा वास्तव्य इति तद्धितेन सिद्धेः दिगादित्वाद्यत् नित्यशब्दात् व्याख्यानेनोपायनियमो नास्ति न
नु उक्तं उपादायापि ये हेयाः स्तानुपायान् प्रचक्षते उपायानां च नियमो नावश्यमवतिष्ठत इति न वा वास्तव्यमित्यत्र स्वरभेदः
कृत्ये किं स्युजिति यदतो दात्तत्वं तदेव यत्तोश्चात दर्थ इत्यनेन विधीयते नैतदभावात् केलिमर इति किं तं गुणादिति
विधानार्थमिति त्वं स्वरार्थं कृत्याइति वक्तव्यं वचनेनानुक्तसंग्रहार्थेनेदं ज्ञापयत इत्याहुः भाष्यविरुद्धमिति शुद्धकर्मण्ये

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰कौ॰
५
5 ष्ठ्य

बभाष्यकृतोदाहृतत्वादिति भावः कृत्यचः उपसर्गादिणोयस्य तउपसर्गादिति वर्त्तते रषाभ्यामिति च तात्स्थ्याता
च्छक्ष्मित्याह उपसर्गस्थादिति प्रमग्नइति टुमस्जो शुद्धौ ओदितश्चेति निष्ठातस्य नः निर्विण्णेति विद्यतेरनुदात्त
त्वान्नेट् रदाभ्यां निष्ठातइति नकारः यकेति नवाच्यं वाच्ये पीति भविष्यतीति वाच्यं रषाभ्यां परस्य नस्येति संज्ञेः व्यवधान
बाधेपि निर्दिष्टपरिभाषाप्राप्तिपि निरस्यन्नपि न कृतो रव्यवधानस्येतेन बाधितुमशक्यत्वात् प्रमाणमाणोति यानेहोप्यु
कृनतः कर्मणि लट् शानच् सार्वधातुके यक् ञानेमुक् नेमुक्तमिति इरएव निषेध्यो न तु रस्य तथा च बाम इति दुर्याण
मित्यपि भवतीति बोध्यं हलश्च इजुप इजुपधस्य कृत्वं तत्तमसंदिग्धमिति हलः इत्येतन्नज्ञदादिलक्षकमित्याह हलो
देरिति इहणोरिति निवृत्तं विभाषेति निवर्त्तते कृत्यचइत्येव सिद्धे विकल्पार्थमिदं तदाह णो वा स्यादिति इजादेः अत्र
हल्वइमनुवर्त्तनं तदंतपरं इजादेर्हलादिलाद्योगादित्याह हलंतादिति विहितइति यद्यपि तु विशेषणं नाश्रीयेत तर्हि
नियमोयं न स्यात् णिजन्लोपे कृते हलंतात्परत्वेन णोर्विभाषेति विकल्पबाधनाय विधेः संभवादिति तथ्याः नच वि
तं स्थानिवद्भावेन हलंतात्परत्वासंभवात् भाष्यस्वरसोप्येवं पूर्वत्रासिद्धेन स्थानिवदित्यस्मिन्नप्यदोषत्वादिष्टाप

विहितइ

५

© Dharmartha Trust J&K. Digitized by eGangotri

वादत्वात् इह विभाषेत्यपि निवृत्तिं इदं कृत्यचस्त्येव न सिद्धे नियमार्थं तदाहुः तन्नस्थस्यैवेति प्रेक्षणीयमिति इ खिगतो
उपलक्षणमिति आख्यानमत्र ग्रहणं प्रेन्धनमिति इविष्याप्तो इदित्वान्नुम् सत्पूरत्वाभावान्नानुस्वारः उपलक्षणस्या
नुस्वारस्याभावात्समेनेति भावः क्षोभणमिति उंभ प्ररणोमस्यान्नानुस्वारः उपलक्षणस्य तत्समत्वे वानिंसणिति सिद्धुंवन
णिष्ट्रुंवुंवने णिदिकृत्साया कृत्यिपर इति निदं नोदाहरणं तु प्रांवः प्रामादिकं एषां तमेति एषां नस्यधात्वंतरत्वा
दप्राप्तेर्वचनं यत्तु हेरचजीति सूत्रे ऽचड़ीति पर्युदासेन केवलग्रहणेप्यधिकरस्य ग्रहणमिति ज्ञापितत्वादिदं ना
पूर्ववचनमिति वदंति तन्न ज्ञापकत्वस्य कुत्वमात्रविषयकत्वात् तथा च भाष्यं ज्ञापकं त्वनयस्याप्यधिकस्य कुत्व
विज्ञानार्थं निनप्रतिषेधप्राप्यर्थतीत्यत्र कुत्वं सिद्धमिति न च सामान्यापेक्षं तत्र पाध्याधाद्येद्रु इन्द्रः अइ त्यादौ णप्य धि
कग्रहणापत्तौ पाचयोघृणा यइत्यतिषेधप्राप्त्यत्ते: अप्रवीयत नाकामकर्तुमिति यत्तु भाष्ये ऽजंतभ्रूतपूर्वमात्रा
दपि यथा स्यात् दित्सं धित्सं स्थादि धातुकस्माच्यः ऽकारलोपे कृते हलंतादिति इण्प्राप्नोति अजग्रहणसाम
र्थ्यादिदेन भवतीत्युक्तं अन्येनतदनुसारिणोप्येवं तेन यतीनावरस्याद्युदात्तत्वं सिध्यतीति तेषामाशयः तदा

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ कौ॰
६

दापात्ततः आर्द्धधातुके विवक्षिते यद्यतो लोपः स्यात्तदा हीदं संभवेत् लोपस्त्वार्द्धधातुके परत एवोचितः
अन्यथा परनिमित्तत्वाभावेन स्थानिवत्त्वाभावेन गणयतीत्यादावुपधावृद्धिप्रसंगादिति न्यायः तच्चिन्त्यं पक्ष
त्वभावेऽस्मिन्नेन विधेयसमप्यपेक्ष्यावैषयिकारणसप्तम्या एवन्याय्यत्वात् लक्ष्यलक्षणाभावसंबंधानपेक्षणा
त् अत एवार्द्धधातुकसामान्ये कारलोप इति भाष्यमुपपद्यतेतरां भाविनोपि बुद्ध्या प्राथमिकत्वाध्यवसायेन रथं
नरसामत्वादेरिव निमित्तत्वमक्षतमेवेति द्विमोऽलुगन्तघत्यास्यप्तन्न स्वयमेवोक्तत्वाः तीव लोप इत्यत्रापि आर्द्धधा
तुकइत्यस्य विषयसप्तमीत्वे निमित्तत्वाक्षतेः किंच दरिद्र इत्येतद्दर्शमपि तत्र दरिद्राते रार्द्धधातुके विवक्षिते त्वा
तो लोप इति वार्त्तिकात् अपिच यङ्लुकि सूत्रभाष्यादिमते पापचीइती घ्नते त्वन्मते च पापाकइति स्यात्
समानाश्रयो लुक् श्लोपेन वाध्यतेन त्वनैमित्तिकोपीति राद्धांतात् तस्माद्यथाभाष्यमग्रहणाभावश्रपकमि
ति दिक् ईयतिः आतो लोप इटि चेत्यत आत इत्यनुवर्त्तते तदा हे आतईत्स्यादिति तत्किंत्रासि शासुहिंसायां केवि
तु सानुस्वारं त्रासिं पठंति तिन्नाह डुवंदेरुर्धा सद्गुहोत्सपत इति सूत्रविरोधात् नानुबंधेति अनुबंधानामनेका ६

© Dharmartha Trust J&K. Digitized by eGangotri

नित्वेऽर्थसिद्धे पक्षांतरे ददातिदधात्योरित्यत्र विभाषाग्रहणेन ज्ञापितमित्यवोचाम आलंभ्यो गौरिति समासांतोदा
त्तत्वबाधकः कुत्सरपदप्रकृतिस्वरः तत्र गपतितिस्वरोऽवशिष्यते शेषमिति घातः यत्तितु यतोऽनावइत्याद्युदा
त्तत्वं स्यात् उपात्प्रशंसायां उपाल्लभेर्नुम् स्याद्यादौ प्रत्यये विवक्षिते इति पूर्वं नुम् ततोऽदुपधत्वाभावाण्णत् अंतस्व
रितत्वं प्राचानुपतिपादयस्तुक्तं तदाकरविरुद्धमित्युपेक्ष्यं प्रशंसेह गम्यमानत्वेन विशेषणं धात्वर्थस्य प्राप्तिरेव तेन यस्य
यस्मात्प्राप्तिः प्रशंसावीजं तदिहोदाहरणं अन्यथा तु प्रत्युदाहरणं उपलंभ्य इति प्रशंसाहेतुभूतप्राप्तिकर्मेति बोधः॥
गदमदचरयमेन पंचम्यर्थे सप्तमी अनुपसर्गेभ्य एभ्यो यत्स्यात् अनुपसर्गेभ्यः किं नैषधे कार्यमिदं निगाद्यं प्रमाद्यं यमेरि
ति पोरदुपधादित्यनेन न सिद्धेरिति भावः नियमे साधुरिति यमः समुपनिविषु चेति पाक्षिके प्राप्ते तद्भिन्नोपसर्गार्थः न चैवं कृ
त्यानां कर्तरीति तृतीया प्राप्ता भावे कर्तृकर्मणोरिति षष्ठी स्यादिति वाच्यं करणत्वविवक्षायां त्वयानिष्पाद्यस्तत्र तद्भिन्नपक्षेपि
तृतीयायाः सुकरत्वात् स्तुत्यर्हमिति पणितव्यं शाष्टीयं यद्यप्यर्थद्वयपरस्तथापि पण्यशब्दस्याप्यवहर्तव्ये एव रूढ इतीदृगर्थनि
यमो लभ्यते निपातनबलात् शतेनेति अनियतसंख्यापरः शतशब्दः कस्माद्वरणेवरवितृणां संख्यानियमायोगात् वृङ् इति
अनिरोधरूपस्यार्थस्य संभक्तिवाचित्वेन संभवादिति भावः दत्येति प्रार्थनार्हेत्यर्थः एतिस्तुशास्वृ इत्यादिना वृञः क्यप्

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰र॰कृ
७
7

रहावथादीनितिर्विभक्तिकानि अनुदंदः तेन स्त्रियामेव वर्यैतिनिपातनं बोध्यं अस्त्रियां तु वृङ् ऋहलोर्ण्यत् वार्याऋत्वि
जइति काशिकायां नवेहश्चतिस्फुटाख्यातिकापृष्टंकथः नत्रहजएवग्रहणंमितिवत्स्प्रमाणत्वात् भद्रिस्फु सुग्रीवोममव
र्यैसावितिपुंसिपर्युपुंजातोजमानिर्देशंमस्येनाउपसर्याकालः प्राप्तोऽस्याः कोल्या नरस्य प्राप्तमित्यधिकारे कालादित्यत् अजन
नं अजनस्तस्याक्ष्यावष्टे गर्भग्रहणइत्यत्र अजर्यांजीर्यतिरकर्मकत्वात्कर्तर्येवेतिभावे यत्स्यादजर्यसंगतेनेति तथाविनिष्टमित्या
न्यायेनाह कर्तरियदिति इदंनिपातनात्कथम् उक्तं च धातुसाधनकालानांप्राप्त्यर्थंनियमस्य च अनुबंधविकाराणां
रूढ्यर्थं च निपातनमिति संगमनंसंगतं भावे क्तः तथाजर्यशब्दस्य वाच्यं न भवति उभयोर्योगानापत्तेस्तत्राह संगतं चद्विशे
ष्यमिति न च कालादिकर्मणा सकर्मकत्वात्कर्मण्येव यत्स्यान्नेति वाच्यं अनभिधानान्नेतिभाष्यकृतान्सर्वात् सोपसर्गस्य
सकर्मकत्वेपीहानुपसर्गस्यनिपातनादकर्मकतावोध्या किं च संभवति सामानाधिकरण्ये इतिन्यायेन कर्तर्येवप्रत्ययो न्याय्यः
अत एवाजर्यसंगतमिति सोऽत्रानिर्देशः संगच्छते अन्यथाऽजर्यसंगतेनेति वैयधिकरण्यं स्यात् संगतं चेद्भवतीति किं
भवतीति र्थ्याख्यानेनतद्दुर्वारं यथा हत्यैलोमस्य मिथ्या त्रलोमानि च लूनानीति कर्तृविशेषणं लोमग्रहणमिति हृत्यैहृषित
लोममितिरितिवैयधिकरण्येपीड्विकल्पो भवति तथा प्रकृतेनेष्यते अतः संगतं चेद्विशेष्यमिति सुष्ठूक्तमिति दि
क्। वदः सुपि च स्तोत्रमिति किंतस्यापि यजादीनामित्युक्ते आङ्गुणः कर्मणीति भुवो भावे यत्रत्राकर्मकत्वा

राम
७

© Dharmartha Trust J&K. Digitized by eGangotri

भावे क्तः शिद्धः कर्मण्यसंभवान्न भविष्यत्येवेति भावग्रहणं व्यर्थमित्युक्त्वा तदुत्तरसूत्रार्थमिति भाष्यकृतोक्तं तथा भावग्रह
णापकर्षणं भाष्यविरुद्धमिति तेषां भावः । एके भाष्यतत्त्वविद इत्यर्थः ॥ अनुपसर्गादित्येवेति । गदमदचरेत्यतस्तदनुवृत्तेरिति
भावः । हनस्त च । सकर्मकत्वात्कर्मणि प्राप्ते तन्निवृत्त्यर्थमाह । भावे क्वचित् । भावे किं । अवघात्यो वृषलः । एतिस्तु । सुप्यनुपस
र्गे भाव इति सर्वं निवृत्तमिति ध्वनयन्नाह । एत्य इति । इत्य इति । इडो दैवादिकस्य तिस्र पेय इत्यपि भवति ॥ नदृड इति । इड वंदद्वेषां सदु
ह्रां एषां तदस्मिन्नेन वार्यत्राश्रस्याद्युदात्तत्वविधानादेतद्ज्ञापकेन तत्र इदिवदि ष्यांनित्यात्मनेपदिष्यांसाहचर्याद्दृड् । एवग्रहणात् ।
पादस्यापीति । तोनेतोरावरूपक इति प्राप्तस्य प्राड् त्वादिति । न वैव माडं किमासी मादावग्रहः । शंकाः इष्टापत्तेः । न लक्षणे
न एवकारा अनुवर्त्तनीय दकारे नामलक्षणमनुवर्त्यं यथा लक्ष्यं पदं कर्त्तव्यमिति भाष्योक्तेः वैदिकैः क्वचिद्ववग्रहः क्रिय
ते क्वचिन्न संप्रदायानुरोधादित्यसंदेहः । यत्तु यत्रार्थनिश्चयाभावस्तत्रावग्रहो न यथा हरिद्रुरित्यत्र हरिन्त्राष्ट्र इकारांततरहरि
द्रुः स्तकारांतत इति संदेहादिति कैयटः । तन्न । अविजंदे वो देवेभिरित्यादावर्थनिश्चयेप्यवग्रहादर्शनात् ॥ ईश्वर वनः । क्वस्वः
सुपरूः इति । न वख्येयमित्यत्र षत्वं तु कोरसिद्ध इत्येकादेशस्यासिद्धत्वात् तथानुकरणं शंक्यः पदान्तपदाद्योरेकादेशोऽसिद्ध इति प्राप्तं
नात् । अन्यथा शिवेच्छन्त्रमित्यत्र कृस्वाश्रयो नित्यस्फुक स्यात् । इष्टस्फ्कदीर्घानपदांतादेति वैकल्पिक एव । आदेन ताद्द् इति

© Dharmartha Trust J&K. Digitized by eGangotri

त्ति प्रश्लेषेण द्वितीय इकारो ऽयेविभाषेत्यात्त्वबाधनायावश्यं विधेयः । अन्यथा ये विभाषेत्यस्यावकाशः स्वापते
स्वन्यते इत्वस्यावकाशो यस्मिन्पक्षे आत्वं नास्ति आत्वपक्षे तु द्वयोः प्राप्तौ परत्वादंतरंगत्वाच्चात्वं प्रसज्येत ये विभा
षेत्यत्र येइति विषयसप्तम्या यकारादौ बुद्धिस्थे प्रत्यये जायमानमात्वमंतरंगं क्यपा सह विधीयमानमित्वं बहिरंगमिति
दीर्घोच्चारणमावश्यकमिति सूत्रे ञ्य इति च्छेदं कैयटः प्रतिप्रयोगमिष्टमित्वमेवांतरंगमिति संतरंगबहिरंगभावे सत्येव परी
त्यात् आत्वमेव बहिरंगं येइति परसप्तम्याश्रयणादंगत्वाच्च इत्वमित्येनात्वबाधोपयुक्त एवेति दीर्घग्रहणं व्याख्यानं पातंज
लं सुष्ठ्वेति दिक् ॥ पुंसीति भार्या नाम क्षत्रिया इत्यत्र विभक्तेरिति डुभृञ् धारणपोषणयोरिति लुग्विकरणाद्धुवु
वंधकः । भरतेरिति भृञ् भरण इत्येकानुबंधकः । भाष्ये तु पाणिनिगृहीतो भार्याश्चाहुः तत्र संज्ञायां समजेत्यत्र व्रजेय
जोर्भाव इत्यतो भाव इत्यनुवर्तनात्कर्मणि क्यपः प्राप्त्यभावात् ण्यदिति भार्याश्चाहुः सिद्धांती तु स्त्रियां भावाधि
कारे ऽस्तीतेन भार्यापि सिध्यतीत्याह । नेन अवश्यवार्या पत्नीति वा कृत्यलका देवण्यदिति पक्षांतरमप्युक्तमिति बोध्यम् ।
राजसूय सूर्य रुच्याव्यथ्याः कर्तरि निपात्यंते पठंति राजसंक्रीणातीत्यादौ तथा दृष्टत्वात् योगरूढ्यर्थं निपातनं तेनाघ
पक्षे ऽश्वमेधादौ क्षत्रियकर्तृके द्वितीये ज्योतिष्टोमादौ च न साधुत्वं उत्वमिति तपरपरत्वाद्धलि च इति दीर्घ इति भावः ॥ ८

© Dharmartha Trust J&K. Digitized by eGangotri

न्ति संक्रान्तिरिति वदः सुप्तीत्यानेन प्रत्ययो विधीयते तत्र यस्मात्प्रत्ययोऽनेन परिहं ख्यायत इत्यर्थः। पापमिन्निवेति कृक्तेः पापाश्च
ये पापेदं मे विड्ढकिट् घोर पीतिकोऽग्रात्। प्रत्ययिम्पां। वक्रूअमिति। हृन्निकृचुछुंदसीति सूत्रे प्रविक्षेप। लोके त्विति। प्रतिग्राह्य
मपि ग्राह्यमिति एपदेवेति भावः। पदासैरि। अवगृह्यमिति। प्रवग्रहो विच्छेदः। अवांतरपदत्वं ज्ञापयितु पदपाठकाले कंचि
त्कालं विरामः इति नव्याः। इयितां मम नित्विधः पपिवांसां सुतस्य। त्यादावर्वांतरपदत्वाभावे पावग्रहदर्शनान्त्रेति यत्नपत्नेदं तत्रा
वाचाम। प्रग्रहः कप्रकृतिभावा घणादि विरहे परस्परमवारसंधिः गृह्यकादिति। गृह्यकाशूद्धद्वीनादिष्वुकः। गृहासक्ताः पक्षि
मृगाश्चेत्युक्तास्ते गृह्यकाश्च तद्स्यमरः। पत्रेवाहनमिति। पत्तगतो पत्तं त्यनेनेति पत्रं दाम्नीशेसयुयुजेति करणेष्ट्रन्। पुण्यो गो
रिति। नवत्तद्वहन रथयुगेति तत्सिद्धे नापीदं सिद्धमिति वाच्यं। एपतं वारयितुमस्यारंभात्। अन्यथा योगो गोरिति स्यात्। अमा
वस्यात्। वृद्धो संत्यामिति। एवं चामावास्यायाश्चेति विहितस्तद्धितः प्रकृतिग्रहणो विकृतेरपि ग्रहणमिति न्यायेनामावास्याशब्दा
दस्य पक्षेपि सिध्यति। यदा तु यत्प्रत्ययांतस्येदं पाक्षिकं निपातनमुच्यते तदा यता मुक्तोऽधिकरणे एपदेवदुर्लभः। अथवा कु
लकाल्लु मेतत एवमपि एपदं तादृहिस्तद्धितो यदं तात्रस्यात्। किंच। पतोऽनावदतुत्तरपदमापद्य। तंस्यात्। अंतस्वरितं वेष्य
ते। तस्मात् एपदं तस्येवेदं निपातनमिति दिक्। अहल्लोपर्यंत। क्वप्रकरणे ग्रागलेरवं तंप्रासंगिकं। पंचम्यर्थे षष्ठी अइति

पु॰क्र॰१

© Dharmartha Trust J&K. Digitized by eGangotri

न धातोर्ग्रहणं किंतु वर्णमात्रस्य। ई उ वंदेत्यादिलिंगात् परं कार्यमिति निर्देशाच्च। लपिदृभिम्यां वेति। पोरदुपधादिति प्राप्त
स्य यतोऽपवादः। यन्नु आप्तुयुधपिर्प्रिलपीति लपिं सूत्रे प्रक्षिप्यानुकृष्टसमुच्चयार्थेन चकारेणादंभेः संग्रह इत्याहुरित्ति कृत्।
तन्नु भाष्यविरोधादेह। एषां नाभावाद्वाप्येषां। स्त्रीकार्यमिति तुल्लुपादिवत्। तथा च श्रुतिः ऋग्दाम्यंग्रहपतिं। विश्वुर्गोपाऽग्रदाभ्यः
नतोदश्चं तिनदभा ति तस्कर इत्यादि। ओरावश्यके। श्रवश्यं भाव इत्यर्थे मनोज्ञादित्वाद्वुञ्। ऋवर्णयोर्नाम मात्रे हिलोपः। लाव
मिति। इहावश्यकत्वं एषतां द्योत्यते। न चावश्यकार्थवाचकस्योपपदत्वान्नंगीकारे। वश्यलाव्यमित्यत्रोपपदंसमासोत्तरपदप्रकृति
स्वरत्वेन स्यातामिति वाच्यं। द्योतकतापक्षेऽपि मयूरव्यंसकादिषु निपातनात् स्वरसमासयोरुपपत्तेः। न च एषतैवावश्यकस्य द्योतनाद
वश्यपद्रप्रयोगानुपपत्तिः। द्यावसपावित्यत्रेव दर्कृविद्योतितार्थस्यापि प्रयोगदर्शनात्। लौकिके लाघवं प्रत्यनादरात्। युमिश्रणे इ
ति। युञ्ज्बंधने इति तु न गृह्यते। सानुबंधकत्वादिति न्यासः। वैरूप्यकुत्वादेरिति। आदिशब्देन वैरूप्यकुत्वादि त्वतो भाष्याद्यगार्हपत्य
द्रमिति। शास्त्रोक्ताविरुद्धविशदाद्योग्याह्याः। एषोऽप्यग्निराने यएव न्यर्थः। उक्तं च। आनाय्योऽनित्य इति वे दक्षिणाग्नौ कृतं भवेत्। एक
योनौ तु तं विधादाने योग्य न्यथाम वेदिति। आनयनक्रियायां विधिरनयोर्निः। एकशब्देन बहुव्रीहिः। एवं च योगार्हपत्यादानीयते। अह
वनीयेन सहैकयोनि दक्षिणाग्नेरपस्मिन्नेवाग्नौ तमानाय्यशब्दं जानीयादिति तृतीयपादार्थः। प्रणाय्यः। असंमतो समम्मत्यभावे

ह
९

© Dharmartha Trust J&K. Digitized by eGangotri

गम्ये इत्यर्थः। एवं स्थिते फलितमाह। अस्मान् इति विरक्त इति वा। यद्वा मास्ति मर्दस्मिन्नित्यर्थः। अपमान् वा अविरक्तो वा अन्यपदार्थाविति वे
ष्यं। धात्वेति। सर्वस्याभिधेनीन धात्वा। किंतु समिधमानवती समिधवती वांतरेण विकृतिबुद्धिरुपमाणा इत्थं या आत्रमत्यं इत्या
दिके वाङ्कविदस्माभिर्धेन्यामपिधात्वाः। ज्ञांसतीति। त्रास्ते प्रयोगो भाक्त इत्यवधेयं। क्तेनेति। पिब नेरधिकरणे यस्त्वत्ययोसुकुल्वनिपात्यते
सुप्यत् निस्वरापत्तेः। यतोऽनावद्स्याद्युदात्तः कृदुत्तरपदप्रकृतिस्वरः। धणि यात् कुउपाध्य इत्यत्रोत्तरपदाद्युदात्तनादर्ज्ञानादितिनयाः
तश्चिंत्यं। एपदं तत्रापि छांदसत्वात्निपातनाद्वेष्टस्वरोपपत्तेः। एप स्वकरणबाधमानाभावाच्च। क्तेनेति किं। कुं उपानं। संवेयः अग्नोपरि
अग्निस्थापनार्थमिष्टकाचयनेन निर्मितस्थले इत्यर्थो ऽभ्यर्था। तदाह अग्निधारणार्थ इत्यादिना। संपूर्वस्य वहेः संप्रसारणं दीर्घश्च नि
पात्यते। चित्याग्निचितोतेः कर्मणि क्यबिति निपाताः। एपदितिनृचित्तं। यतोऽपवादः। इहाप्याचित्यनुवृत्तं ऋ चिसमेवविशेषणमेतरस्यानस्य
भावार्थकत्वेनाग्निवाचकतायोगान्तदाह। चित्यो ऽग्निरिति। अग्नेः किं। चियं तृणं। अग्निचित्येति। अंतोदात्तोयं निपातनात्। क्तेल्प
इति। हसितं हसनं छात्रस्य शोभनं। अत्र क्तल्यटोर्विषयेन प्रसके भावेन घञ्। इच्छुतिमोकुं। इच्छार्थेषु लिङ्लोटाविति लोट्। ना। लि
ङ् इति सूत्राल्लिङ् भवत्येव। ईषत्पानः सोमो भवता। आत्मनोयुच् इह खलून। गोदथ्य इति। लवधलषलढलोपे पु सहि [illegible] वहोरित्यो
त्वं। आधवादिति। वकारे णोवलघुनेतिभावः। युक्तिपाचुर्यपुंकेश्री [illegible] कान्त्रैरत्ना करेऽतुले। कृत्यानां प्रक्रियापूर्णा वेंकटेशस्य तु

© Dharmartha Trust J&K. Digitized by eGangotri

इष्ये २ इति कृत्यश्च क्रिया। ण्वुल्तृचौ। णिलं पु गृहिङि. ल्व त्रि निषि धा यर्थं लितं स्वरार्थं विलं तु न स्वरार्थं प्रत्ययस्वरेणासिद्धेः। नापिदी
र्घवि धाव प्रत्न वा वित्यत्र विशेषणार्थं सामान्यग्रहणाविघातार्थं वा। तदिमेव तत्र सुवचत्वात्। न च मातरो मातर इत्यत्र दीर्घापत्तिः
यो नि सं वं सवा विनां दीर्घश्चेन स्यात् ग्रहणे वेति नियमोऽस्ति। किं तु तुरि हे मेयस्तु तु शुं दसा मत्रसामान्यग्रहणाविघातार्थमिति बोध्यं। का
ल... लिंगत्रय साधारणत्वेनाविति ध्वेन यन्नाह। कारिका कर्त्री तिनि स्थानशिनेति। र आदिभ्य श्चेति वेद। प्रक्रंनेति। प्रोपाभ्यां समर्था
भ्यामिति क्रमेरात्मनेपदविषयत्वं। अल्लोपस्येति। यत्तु ज्ञाबान धातुलोप इत्यत्र इक इत्यनुवृत्तेः पापाचेक इत्युक्तं। तन्न। पदं लुगं तेन
धातुलोप इत्यस्याप्राप्तेः। यङं तेऽल्लोपस्य स्थानिस्थानिवद्भावात्। श्वपाकोपीति। कर्मण्यणि विपक्षे भवतीति भावः। लोलुव इति॥
सुपोऽभावाद्दोः सुपीति न यण्। इगुपधज्ञा। ण्वुल्तृचावुपसर्गात्किर्णामयमपवादः। एवमन्यत्रापि यथायथमूह्यं। अत एवाह। वास
रूपेति। मेघः देवः सेव इत्येतेपवादोपाठात्साधवः। पाघ्रामा। इह केचिदुपसर्ग इत्यनुवर्तयंति। तदस्मेषामसंमतं। यदापरूपपत्स्यते रूक्म
वर्णमिति श्रवणात्। फलानि धूमस्य धयानि निति श्रीहर्षोक्तेश्च। अनुपसर्गाल्लिंप। इह लिंपविंदेति भाविनानुमानिर्देशात् लाभार्थस्य
विदेर्ग्रहणं न तु ज्ञानार्थानां विदीनां। लिंपः विंद इति। तुदादिभ्यः शः शेमुचादीनामिति नुम्। धार यइति। अपि गुणाद्यादेशो ध्रुवधा
रणे। धृङ् अवस्थाने उभय प्रकृतिकं यत्तस्य ग्रहणं। कथं न मस्यमत्रोत्तर धारयस्यतइतिनेव ध्रुवः। कुंभकारादिवत्सरत्वात्कर्मण्यणि
न्याय्यत्वात्। सत्यं गंगाधरादिवत्तत्र शेषषष्ठीसमासे भविष्यतीति गृहाण। वेदय इति। विद वेतना ख्याना दिषु चुरादिः। ण्यन्तः। ज्ञाना घर्थ

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकृतिक हेतुमण्यन्तो वा ॥ अरविंदमिति । चक्रस्य नाभिनेम्योरंतराले स्थिता निबिडा नि अराः । तदाकाराणि दलानि तत्स्मात् इत्यपादराः ताभिर्विंद
ते लभत इति कर्मण्यणि प्राप्ते वचने नारदादधाताः । नतु दददाने दधधारणे । आभ्यामविंदधोरदध इति सिद्धं दाधाभ्यां णो दायधाय इति किमने
नेति चेत्सत्यं । स्वरार्थमिदं सूत्रं अदद अदधः । आत्मनेपदपूर्वपदप्रकृतिस्वरश्चाने । अजं तत्वे तु न अः परस्मात् तस्मात्कावच्चात्त्याविषये तो दान
त्वस्मात् । गा धा शह्यानुपसर्गादिति निवृत्तं । अत्र सूत्रे नुपसर्गग्रहणात् एवं वन स्वं चंद्रं विभाषाग्रहणमपि निवृत्तं । तयाह । नित्यमिति
श्येङ्ड् इति । गोडीयमणो दे नत तथा । अतनेरं श्छंदसि नांपतत्यादीनामेदंतानां वानग्रहणं । व्याख्यानात् । अवश्याव श्यनाहारः । दार्यधाय इति
लक्ष्यानुरोधात् । आस्त्रवर इति । दत्यादिरयं । एवं संस्रवोपि वचने स्थित आश्रवरत्सपरो प्येवं । तालुमंपठितो भूणोति रुजः शाधानदनल
कइमितिभावः । दब इति । दबदावो वनमरण्यवन्हीदत्यमरः । गेहेक । गेह इति नोपपदं किं तु प्रत्ययार्थविशेषणं । गृहपतिना संयुक्त इति । तदाह निर्देशात्
गेहे कर्त्तरीति । यत्तु गृहग्रहणाद इति भो वादिकात्विगुपधलक्षणे के गेहमिति सिद्धे विदं सुत्यजमिति न्यायः तदसत् । यो गरूढत्वबोधनायेत
दारंभात् । अन्यथा देवदत्तादावपि गृहशब्दप्रयोगापत्तिः । अत एव कर्त्तरि इगुपधलक्षणः कः प्रत्ययो नोत्पद्यते नभिधानादिति दिक् ॥ भा
ष्यमते लिति । तथा च षष्ठे रजकरजनरजनेरजः सु तलोपस्योपसंख्यानमिति वार्त्तिकं प्रत्याख्यातुं भाष्ये कि कि त एते औणादिका इति । एवं
च मूलोक्तमपि अके अने चेति वार्त्तिकं समानार्थकं प्रत्याख्यानमेवेत्यवधेयं । गस्थकन् । गा मा दाग्रहणेष्वविशेषे गैगे शब्दे इत्यस्येव ग्र
हणं न तु गाङ् गता वित्यस्य । गाथकः शब्दस्य गापत्यर्थविषयकशिल्पिन्येव रूढत्वादित्याशयेनाह गायतेरिति । हृस्वः हीः । उत्तरसूत्रानुवृत्तस

© Dharmartha Trust J&K. Digitized by eGangotri

सूत्रे निर्देशाद्धि निगमकाभावादुभयोर्ग्रहणमित्याह। हाको हाङश्चेति। अजहातु उदकमिति। उदकाद्विषिकं वर्द्धनात्। प्रकृत्यन्तः। लक्ष्य
नइति। समभिहारो नाम पौनःपुन्यं। तेन यो याः क्रियाः पुनः पुनरनुतिष्ठति स तत्र प्राधान्येनाको ग्रहणं प्राप्नोति। इत्थं च यः सकृदपि सुष्ठु करोति
तत्र वुन्न भवति। वक्तुर्लोपि दुःखं कुर्वन्ति वुन्नेति भावः। कर्मण्यण्। कर्म त्रिविधं। निवर्त्यं विकार्यं प्राप्यं चेति। तदुक्तं हरिणा। सती वा विद्य
माना प्रकृतिः परिणामिनी। यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते॥ यस्योपादानकारणं नास्ति तन्निर्वर्त्यं। यथा संयोगं करोतीति। य
स्यापि सदप्युपादानं न विवक्ष्यते तदपि निर्वर्त्यं। यथा कुम्भं करोतीति। यदा तूपादानमेव परिणामित्वेन विवक्षितं तन्मृदं घटं करोतीति। तदा
विकार्यं। भेदे विवक्षिते तु मृदो घटं करोतीति। तदपि निर्वर्त्यमेव कर्म। विकार्यमपि द्विविधं। प्रकृत्युच्छेदसंभूतं किंचित्काष्ठादिभस्मवत्।
किंचिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवदिति।२। तृतीयं तु। क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते। दर्शनादनुमानाद्वा तत्प्राप्यमि
ति कथ्यते इति।३। व्रीहीन् प्रोक्षतीत्यादौ संस्कार्यं चतुर्थं कर्मेति मीमांसकाः। तस्यापि प्राप्य एवान्तर्भाव इति वयं। कुम्भं करोतीति। उपकारी
त्यादि निर्वर्त्यं वा विकार्यं चैतत्कर्म। नित्यसमासत्वादस्वपदविग्रहो लौकिको दर्शितः। अलौकिके तु अलौकिके कृद्योगलक्षणा षष्ठी तस्या कु
म्भ ङस् इत्यस्य सुबन्तस्य प्रागेवाण्प्रत्ययात्समासः। गतिकारकोपपदानां कृद्भिरित्यादिवचनादित्यर्थः। अत्र कश्चित्। निवर्त्ये विकार्ये चो
पपदमिति वचनात् प्राप्ये न भवति। तेन आदित्यं पश्यति हिमवन्तं शृणोति। ग्रामं गच्छतीत्यादिवाक्यमेव साधयति। तन्न। वेदाध्यायः
चर्चापारः काण्डपार इत्यादावण्प्रत्ययदर्शनेन वचनस्य प्रत्याख्यानात्। तार्किकोक्ति प्रसंगदृष्ट्या शाकटायनाह अनभिधानान्नेति। आदि

॥

© Dharmartha Trust J&K. Digitized by eGangotri

संपश्यतीत्यर्थे आदित्यदर्श इति प्रयोगो नास्त्येवेति भावः। शीलिकामीति। पूर्वपदप्रकृतिस्वरोऽप्यत्र बाध्यः। अणोऽसिद्धेणस्य विधानं
दावर्थं न हर्षीयति। मांसशीलेति। सप्तम्यर्थे तो मांसष्टोऽन्तोदात्तः समासेऽपि स एवावतिष्ठते। कल्याणेति। लघावंते द्वयोश्च बह्वषो गुरु-
रिति मध्योदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरोऽपवादः पूर्वपदप्रकृतिस्वरो विधीयते। सुखप्रतीक्षेति। स्वरः पूर्ववत्। काचामः। माङ् मञ्ज-
रि हृग्रहणं न तु मामानमित्यस्याकर्मकत्वात्। कायवाद इति। उत्तरसूत्रेणाण्ण्वुलादिकप्रत्ययस्य। नाणिति। वासरूपविधिना नानुबन्धकृ-
तमसारूप्यमिति तु क्तेः। गोसंदाय इति। आतो युक् कृद्विधाविति। के सति ग्रहिज्यादिना संप्रसारणे परपूर्वत्वेन कृते इयङु-
वङोऽस्यानामिति उङ्विधिः। सर्वत्र ग्रहणादिति। संनिहितासंनिहितकृद्विधावित्यर्थः। आह्व इति। केऽस्मा दीर्घापां श्राहृवा। आलंडि-
लाहि लोपः। एतच्चमुत्याज्ञं। अलूकः। न चेयङ्वङोरंको। अंतरंगमपि सर्वपूर्वरूपं बाधित्वा वर्णादांगस्य बलीयस्त्वादातो लो-
पेन स्यास्थाविवत्वादसिद्धवदत्रेत्यसिद्धत्वादियङ्वङोरप्रवृत्तौ यणः सुकरत्वात्। न चैवं जुवौ जुहुवुरित्यत्रापि यणापत्तिः। इ-
हातो लोपाभावात् संप्रसारणाच्च। एङः पदान्तादतीत्यत्र गो गो विभज्यते। एङः संप्रसारणादेङः पूर्वरूपं भवतीति एतत्सामर्थ्यादातो-
स्यागेव पूर्वरूपं प्रवर्तते न तन्नियङ्वङ्। न चैवमाकारत्वात्रापीयङ्। एवं पूर्वरूपापत्ताबुवङ्प्रसंगः। पूर्वमात्वप्रवृत्तेरावङ्पंभावात्। आदे-
तनां विनाकप्रत्ययोत्पत्तेरसंभवात्। काचामश्चेति लिंगाच्च। लिडिति। आतो लोप इटि चेत्यात्वप्रवृत्तेः प्रागपि लिडुत्पत्तेः संभवात्

© Dharmartha Trust J&K. Digitized by eGangotri

विस्तरस्तु भाष्यादावनुसंधेय इति दिक् । सामर्थ्याद्भाव इति पूर्वे स्त्रीवत्कर्त्तरि सिद्ध इतीह कर्त्तरि कृदिति न प्रवर्त्तते । अनिर्दिष्टा
र्थस्स्वार्थे । स्वार्थश्च धातोर्भाव एव । नचैवं घञर्थे कविधानमित्यनेनैव गतार्थम् । नित्यसमासार्थमस्यारंभात् । =एतदेवाखूना
मुत्थानमित्यस्वपदविग्रहो दर्शितः । =आखूत्थ इति । आवानपुंसकं पठितं तत्सौत्रेणाभिनिविष्टेन व्याख्यानं । तत्सर्वं भाष्यविरुद्ध
मित्युपेक्ष्यं । ननु स्थ इत्यनेन विधीयमानः कः समस्थ इत्यत्र कर्त्तरि कं बाधेत । मैवं । यद्यत्र साक्षाद्भावग्रहणं ग्रहणेन भावे को विधीये
त तदा भावः कर्त्तारं न कः कोऽपि न्यायेन बाधेत । सामर्थ्याल्लब्धं भावे पारिशिष्यात् इति भावे न न बाध्यते कर्त्ता । अर्थाच्च । कप्रत्ययान्तस्येति
जेन गोस्थानं भूमिस्थितमित्यादौ न षः । द्विष्ठस्त्रिष्ठ इति । अंबष्ठः । आंबष्ठः । गोष्ठः । भूमिष्ठः । सव्यष्ठः अपष्ठः । कुष्ठः । शंकुष्ठः । अंकु
ष्ठः । मंजिष्ठः । पुंजिष्ठः । परमेष्ठः । बर्हिष्ठः । दिविष्ठः । अग्निष्ठः । तुंदशोक । आलस्येति । आलस्ये गम्यमाने सुखस्योत्पादने च प्रत्ययो भव
तीत्यत्र सामर्थ्यादलसे कर्त्तरि सुखस्याहर्त्तरि प्रत्यय इत्युक्तं । तुंदपरिमृज इति । इह मृजेरजादाविति वैकल्पिकी वृद्धिः प्राप्ता
व्यवस्थितविभाषयानेत्येके स्यादेवेत्यपरे । शोकमिति । ननु सुखमुत्पादयतीत्यर्थः । गोसंख्य इति । गाः संचष्ट इति विग्रहे ख्याञू
ख्याञ्प्रकथन इत्यस्य सम्पूर्वस्यैव प्रयोगो नास्तीति न्यासः । गापोः । टित्वं ङीबर्थं । किन्त्वमातो लोपार्थं । गायतेरेव ग्रहणं । ननु गाङ्गतौ
गास्तु तावित्यनयोरनभिधानात् । पिबतेरिति । लुग्विकरणपरिभाषाबाल्लब्धं इतरत्तु वावनिकमेव । कच्चग्रह इति । कच्चबोध

© Dharmartha Trust J&K. Digitized by eGangotri

मनं क्रियमाणां संभाव्यमानं वा वयो द्योतयति। तेनाल्पापि कवचहरणी कवचहर इति भवत्येव। हस्तीति। अस्मात्र तुल्लेवरं ता। करो
ऽपि ता। आकिलांगालेति। घटग्रहणेन घटीग्रहणे सिद्धे लिंगविशिष्टपरिभाषायाऽनित्यत्वज्ञापनार्थं। आविधातोः। टो माभूदिति
अवोऽवकाम्राः। यांवदः। टस्याव कामाः। आढ्यंकरः। आंकरे तत्रोभयप्राप्तिगोपरत्वादेव प्राप्ते पुनर्धातुग्रहणादजेवेति टाबूभवति। नडीवि
तिभावः। कुरुचरवाडवइत्यत्र मते तु कृञो भेदं रूपं किं तर्हि गृह्णातेः आश्रुकर्मणाइति टस्य प्राप्नोत्येव नेति। तेन संग्रहैषा। अत्रगाकारस्य
दशादित्वात्संज्ञायां ककारादेशोऽशंकरासिद्धेति धातुग्रहणेन कर्तृत्वमिति के घटस्याप्ये -अधिकरणे दिग्धसह पूर्वशब्दाज्जंमः। दिग्धे क
न सह शेते दिग्धसहशायः। भिक्षाचरइति। चरणेन भिक्षामर्जयतीत्यर्थः -पूर्वत्र चरणपूर्वकेऽर्जने चरिर्मात्रैः सेनाचरइति। सेनां चर
ति। प्रविशतीत्यर्थः। पवादिष्विति। टविधानं कुरुचरादौ नित्यसमासार्थं। तेन कुरुषु चर इत्यादौ स्वपदविग्रहो न भवत्येवेत्यवधे
यं। दिवाविभा- कर्मणि स्तुणीच द्वयमेवीहानुवर्त्तते नत्वाकर्मके पुसुपीत्यस्यानुवृत्त्र कर्मणीत्यस्य संबंधः। अहर्ल्हादौ वपीति। अपिश
ब्दाद्बलादौ। भास्करइति। कारकः- अंतकरः अनंतकरः -आदिकरइत्यादि इति वार्त्तिकमिति। यत्तु इह द्विरयमिति माधवाचार्याः
तदयुक्तं। भाष्यकैय्यटविरोधात्। तत्र वार्त्तिकेन सत्त्वस्य बाधितत्वात् टस्याभावे किं करीत्यसाधुरित्याहुरिति कैय्यटः। -आकुरितस्वरसो
ज्ञापनं वचनप्रामाण्यात्पक्षे टस्तिकिंकरीति ङीपोऽप्रवृत्त्वात्। नहि भाष्यकृता सूत्रे किं यत्तदु कृग्रहणप्रत्याख्यानं। एतेन हेत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ष॰कु
१२
13

दावपिटं वाधित्वाऽजवेति कैय्यटाशय इति कौस्तुभोक्तं निरस्तं ॥ ननु एवग्रावा किंपचध्वदुह्यज्वेति विकल्पस्य उक्तः यत्तु विकल्पो केराक
र विरुद्धत्वात्कर्मण्येणोदुर्वारत्वाच्चतन्नेति कौस्तुभमनोरमयोर्नाशः ॥ तन्न ॥ विकल्पः कैय्यटसंमत इत्युक्तत्वात् ॥ ननु ण्वुलन्तस्य एत्ति दिवा
विभेति टेन वाधितत्वात् ॥ न च दिवाविभेत्यत्र किमादिग्रहणात् हरदत्तादिभिः प्रत्याख्यानमिति वाच्यं ॥ भाष्यकैय्यटविरुद्धस्य तस्याप्रामा
णिकत्वात् ॥ यद्यपि किमादिग्रहणं प्रत्याख्यातं तन्न धापि हेत्वादौ विवक्षिते परत्वाद्दणं वाधित्वा क्रञो हेतुताच्छील्येत्यनेन टो दुर्वार एव
तस्मात्किंकरोतीत्यपि साध्वेवेत्यवधेयं ॥ वृत्तौ तु अथ वा एष वादिषु पाठ करिष्यत इत्युक्तं ॥ तत्र किमादिग्रहणमपनीय एववादिष्वेव किं
यत्तद्बहुषु कृञ इत्येव पाठ्यमिति तस्यार्थः ॥ अस्मिन्पक्षेपि हेत्वादौ परत्वाद्दणं वाधित्वाटेन भाव्यं ॥ तेन न किंकरणशीला किंकरीति भवत्ये
वेति ॥ इत्थं च वृत्तिग्रंथस्य भाष्यकैय्यटाभ्यां सह न विरोधः ॥ अन्यथा भाष्यकैय्यटमतेन व्याख्यानतरीत्या किंकरीत्यस्यासाधुत्वेन द्वि
रुक्तो वृत्तिग्रंथोऽशुद्ध एव स्यात् ॥ मन्मते तु सर्वग्रंथानामेकरूप्यं सिद्धं फलभेदाभावादिति दिक् ॥ परत्वादिदि ॥ यत्तु सर्वविप्रतिषेधेन
हेत्वादौ ट एव भवति तेन न किंकरीसिद्धिरिति न्यासकृदाह तत्र सर्वविप्रतिषेधांशो निर्मूल इत्यनुसंधेयेति ॥ दुंधो गेऽडीविति ॥ सर्वसंम
तमेतत् ॥ कर्मणि भृतौ ॥ कर्मानुवृत्तौ पुनः कर्मग्रहणं स्वरूपपरामित्याह ॥ कर्मशब्द इति ॥ कर्मणीति शेषः ॥ अरुर्द्विषत् ॥ वर्णग्रह
णेन दंतविधौ सिद्धे अंतग्रहणं व्यर्थमिति चेन्न ॥ समीपवाची अंतशब्दः ॥ अव्ययासावंतश्चेति विग्रहः समीपः पश्चात्प्रत्ययायेति विहि
तो यो कृस्वात्मको वृत्तद्दंतस्येति व्याख्येयं ॥ तेन गुणात्राद्दृस्य पूर्वकृस्वनंतो मुम् भिन्नुमिंधयः सिद्धः ॥ वारिति ॥ कुक्ष्यात्मनो मुम्स्रवेति वक्त

© Dharmartha Trust J&K. Digitized by eGangotri

13

यमिति वार्त्तिकमनेन प्रत्याख्यातमिति भावः। आर्द्धं तु हा इति। स्तनंधुरादि कुत्सायां धञ्। नाडीं धमानात्कृः। मन्तुत्रा करे कुस्मपं दिना
चाकरेति लगद्धेश्चिति विपाठः कूर्द्ध श्वजहाम् गा। इत्युदाहरंति। तन्तु ताळंगादिपाठस्य भाष्यवृत्त्यादौ प्रसिद्धत्वात्तद्विरुद्धमप्र
मानमिति। नखाः। वस्कृतस्कन्केषु विस्तुस्कन्केषु भाष्यवार्त्तिकयोस्तु जगद्धेश्चिति पाठो गर्द्धजहाम् गा इत्युदाहरणं वहद्रूपत श्वि
वो ध्मं नासिका। अत्र वार्त्तिकमिति। तेन यथासंख्यं न। तत्राप्ययं विशेषः स्तनेनेट् एव खश् न ध्माधानोः। नासिकायां तु माभ्यामि
ति। धेट् स्थिलावादिति। अवयवे वरितार्थस्य लिंगं समुदायस्येति न्यायादिति भावः। विध्वंतादेव धेटो ङीविधानात्तदित्याह स्तनं क्षीर
स्वामिप्रभृतीनां संप्रदायः। तेन पाघ्राध्मेति ग्राप्रत्यये आतोऽनुपसर्गे क इति प्रत्यये वदा वेवेत्या कृः। नाडीमुष्ट्योः। ध्यंतमस्य सर्वविपाना
करणस्य फलमाह। यथासंख्यं नेष्यत इति। नाडिंधम इति। वित्य न यथासंख्येति कस्य। पाघ्राध्मास्थाम्नेत्यादिना धमादेशः। नासिकंधम
मेघ्यविं। घटीखारीति। खरीमिति कुस्य पाठो भाष्येवृत्तौ च नास्त्येव। उदि कूले। सप्तमी निर्देशादुत्कृष्टेन स्वाद त्रेणोपपदं। यथासंख्यम प्र
संगात्। अन्यथा त्वा वदावुत्कूलयोरित्येव ब्रूयात्। तस्मादुदीति पंचम्यर्थे व्यत्ययेन सप्तमी। रुजिवहोरिति षष्ठ्यपेवं। किं वरुजेः
सकर्मकत्वात्कर्मण्युपपति पदे। तेन कूलमेव विशेषणीयं। नोद्धेदः। असत्वा विवेत कर्मत्वायोगोदित्याशयेनाह। उत्पूर्वाभ्या
मिति। कूलमुद्रुज इति। पूर्वमुद्गा गतिसमासः पश्चादुपपदसमासः। अरुंतुद इति। अरुंतुदस्तु मर्मस्पृगितिश्चमरः। अरुषो द्विपा
मीर्ममरुरिति वा। सूर्यंपश्यं पतीति। गुप्तिपरमिदं। तस्माद परिहार्यदर्शनं सूर्यमपि न पश्यंतीति इतरा पुरुषा नेति किमु वक्तव्यमि

© Dharmartha Trust J&K. Digitized by eGangotri

त्यर्थः तेनसत्यपिसूर्यदर्शने सूर्यंपश्याइति प्रयोगोभवत्येव यदास्वसूर्यदर्शनाभावमात्रं विवक्षितं तदनदितरं वंदादेर्द
र्शनेबाधदारवत्त्वं न भवत्यनभिधानात् प्रियवशे खच्प्रसिद्धे खश्विधिरूत्राप्यार्थः परंपरेत्यत्र क्रमत्वणिलोपोयथासा
तांनामपिगुणायादेशो मा भूतामिति । किंच इह किंचित्तपोऽस्तिन्ध्यायेनान्मन्तोऽपिखश्चा नदेतद्वार्त्तिकमुखेनाह गमेरिति
न्यसंज्ञार्थमिति संज्ञायांतुगमश्चसुत्तरसूत्रेणोव सिद्धः मितंगमइति । खश्छिच्वं स्यादनः खच्विधिः । विलंबखिङ्क्रम
इत्यत्र विशेषणार्थं । कोऽस्मिन्नपिदिष्टमर्थो । नवेवं खेक्रमइत्युक्ते जनमेजयइत्यत्र खश्पिक्रयापत्तिः एकानुबंधग्रह
णेद्यनुबंधग्रहणस्याग्रहणात् । नचैवं कुलीनइत्यत्र कुलाच्चइति खपस्येति लोपबाधनायकः खः स्यादिति शंक्यं प्रक
रणसाहवर्यादीनुपत्तस्यैवग्रहणात् । किंच दोषोणाबातातोणावित्यनुवर्तमानखपरेणोक्तत्वविधानात्र कश्चिद्दोषः तुमे
तद्वितं ज्ञापकोपष्टंभधत याद्ववलायानिरनुबंधकेत्यस्याबाधमानाभावेन द्विषंतपे कुलीनेवा माम्भूत् इति कोऽपिविदुरा
सायविलसाफल्यात् परिभाषाज्ञावल्यादेवणावित्यनुवृत्तेस्याद्विपिपरास्तं क्राद्रोनिश्चायामितुत्तरसूत्रेणाविभ
नुवृत्तेरभावाद्वेतिदिक् खिलमुमर्थं वाविताकृताष्टेइति कर्मत्वाविनीतिशेषः । तदन्तरनिः शास्त्रोक्तो वनिपमोङ्नं । वाम
यमवाखिपमोङ्नेइति सूत्रे ऽभूः सर्वयोऽस्त्यत्र पुरिदारेरिति संज्ञायां सुमयमस्त्रिरस्कः । न थैव बाचंयमत्यनेनैव खज्याक्र । वा
चंयमन्नाह सूत्रे नेसाकं नतुमिपातनाल्लुप्यते । पद्मावाचंयमो ङ्नं पुरंदरश्चेत्येव सूत्रपितयां । एतत्सूत्रपरमजप्रयोजनम् ।

© Dharmartha Trust J&K. Digitized by eGangotri

ग्यामइति। कर्मण्युपपदे वेहृभवति॥ पूःसर्वयोः॥ पुरसर्वयोः कर्मणोरुपपदयोर्यथासंख्यंदारिसहोः खच्स्यात्॥ ईदृविदा
रणे। अस्यैवग्रहणं। नतुदृभयेऽइ॥ आदरे इत्यनयोरितिसंप्रदायः॥ अर्थप्रतीत्यनुरोधाच्च॥ सहिग्रहणमसंज्ञार्थं॥ संज्ञा
यांतुसंज्ञायांभृतॄवृजिदारिसहितपिदमः इत्यनेनसिद्धं॥ वाकुलकेनेति॥ भाष्याद्रावदइत्यादिइतिभावः॥ सर्वकूला
षुचतुर्षु कर्मसूपपदेषु कषेः खच्स्यात्॥ मेघर्त्ति॥ एषुत्रिषुकर्मसूपपदेषुखच्॥ क्षेमप्रियां॥ एष्विति॥ कर्मसूपपदे
ष्वित्यर्थः॥ अयंवैशिरत्वाद्यांशिवएकोधोयः॥ शिवंकरइतितुशंदसत्वात्साधु॥ आशितेभुवः॥ सुपीतिवर्त्ततेनतुकर्मणी
ति॥ भुवोऽकर्मकत्वात्॥ नचसोपसर्गस्यप्राप्त्यर्थस्यभुवः सकर्मकत्वमस्तीतिवाच्यं खच्तत्रानभिधानान्नेतिशि
ष्टसंप्रदायात्॥ आशितंगवइति॥ तस्यकृतिकेसुवंतइत्यर्थः॥ सव्वेहृक्विविधोगृह्यते अत्रभोजने अस्मादाऽपूर्वका
कर्मण्युपविवक्षितेकर्त्तरिक्तेसत्येकः॥ प्रत्रोर्पत्नात्रयोऽप्येकर्मण्युपपदे॥ आशितः कर्त्ताइत्याद्युदात्तविधिर्द्वयोरपितुल्यः
नतांत्येप्रयोज्यएवभूतेह्वर्वगत्वाकर्त्ताख्यते॥ प्रत्यवसानार्थस्याणौकर्तुर्णौकर्मतातेनः॥ आद्येतुसांप्रतिकमेवकर्तृत्वं
घक्तोऽधिकरणेचध्रौव्येतिभावकर्माधिकरणेषुक्तस्मर्दंतोनगृह्यते॥ अनभिधानादितिभावः॥ आशितंभवति
पावनोदनेनातिथिर्भोज्यतेसएवभुज्यते॥ आद्येभुजिक्रियाकर्तृकमवनकरणमोदनइतिबोधः॥ अंत्येतुचेत्रब्रा

© Dharmartha Trust J&K. Digitized by eGangotri

२५ पारत्रयोऽप्यमुष्मिन्क्रियाभिन्नकर्तृकभवनकरणमोदनइति।भावेतुदाहरति।आढ्यंभवइति।भवनमात्रविवक्षायांको
15 वाधेऽत्रेतिभावः।इहवासरूपविधिनाल्युडपि आढ्यंभवनः।आढ्यंभवनं।घञ्तुसरूपत्वेननित्यंबाध्यते।नचल्यु
ल्युट्तुमुन्नितिप्रतिषेधात्ल्युडप्युक्तइतिवाच्यं।घञादेरपवादत्वेनविधीयमानानपेक्ष्यल्युडादयस्तेघञादीन्नसं
बाधंतेनविकल्पेनेतितदर्थात्।प्रकृतेतुल्युटोऽपवादःखच्।तत्रवाऽसरूपविधिप्रवृत्तौनकिंचिद्बाधकं।इत्यादि
विहल्युडुदाहरणमतएवसंगच्छतइतिदिक्।संज्ञायांभृतॄवृजिधारिसहितपिदमः।भृतॄजिधारिसहितपिदमः।वृतॄजि
संज्ञायां।विश्वंभरःकैटभजित्।रथंतरं।पतिंवरा।धनंजयः।युगंधरः।शत्रुंसहः।अरिंदमः।इति।तत्फलंतुस्वाणवग्रहो।रथंतरमाजमारे
तपत्रकृत्युत्तरपदस्वरेणांतोदात्तत्वरथमित्यवग्रहश्चदृश्यते।अरंतुलेतुनद्विपद्यसेसाधुदांतत्वमवग्रहाभाव
श्वस्यात्।अरिंदमइति।वाहेदिच्यनिग्रहीतेत्यर्थः।इतुक्रमिति।धातुवृत्त्याद्यनुरोधेनमतांतरमिति।हरदत्तोऽस्मि
तेनागमश्च।कर्मण्युपपदेगमेःखच्यात्खुनंगमइति।यस्मात्सौतंगमिः।पुत्रःसएवमुच्यते।योगविभागउत्तरार्थः।
कुमारशीर्षा।आढ्यंपिहनइत्यनोहनइतिवर्त्तते।एतयोःकर्मण्युपपदयोर्हन्तेर्णिनिःस्यात्।ताच्छील्याद्यभा
वेपिणिन्यर्थमिदं।शिरसःशीर्षादेशोर्थः।लक्षणजाया।लक्षणशब्दोमत्वर्थेभाक्षइत्याह।लक्षणवानिति

© Dharmartha Trust J&K. Digitized by eGangotri

णा पाद्धे ति। जायाघ्न इति स्र्व कं पाणिरेखादिकं यस्यास्तिसा नां हन्तं ती भाव्यो अपदेशः। एवं पतिघ्नी। किल्वाङ्गमह
नेत्युपधालोपहित्वात् ङीप्। अमनुष्यकर्तृ। नगरघातो हस्ती चोरघातो हस्तीत्यत्र तु वाकुलकादण्। शक्तो हस्ति
घ्नः को किं। विषेण हस्तिनं हतीति हस्तिघातः। शक्तिर्ब्रह्मणवत्वात्तत्र शक्तो देहं तु शक्तिरिति विज्ञायत इति भावः
कपाटघ्न इति। कं शिरः पाटयतीति श्रविशात इति कपाटम्। कवाडे इति। कुत्वाद्रूपपदे ऽटतेः पवाद्यच् कर्वे वा उच्च इति यो
गविभागात् क्वः कवाटेघ्न इति पदमञ्जर्यां। आढ्यसुभग। आढ्यादिषु कर्मसूपपदेष्वच्व्यन्तादिति सूत्रार्थः। सुभगंकरणं
स्थूलंकरणं पलितंकरणमित्यादि। प्रतिषेधसामर्थ्यादिति। तथा हि आढीकरणमित्यत्र रूपं सुट् ख्युनो स्कल्यसू
ख्युल्यपि मुमहृस्वो न स्तः। छ्यंत सामायके नानम यत्वे ति पर्युदासात्। नित्यसमासोपि गत्युपपदयोः स्कल्यः। अव्य
रे विशेषः। ख्यु निमित्ते स्वरेणास्तु दिति तित्स्वरेण कृदन्त उदात्तत्वे विशेषाभावात्। न वा च्वावित्युक्तार्थमिति पुक्तं। केवलो
क्तार्थत्वेत तत्रैव वक्तव्यत्वापत्तेः। अन्त एवोक्तं मिहेति। इह किं विवक्षितो रितिन्यायोनेन ध्वनितः। भाष्यमतेतिविति
भाष्यवार्त्तिकप्रामाण्यादिह किं विवक्षितो रितिन्यायो नाश्रीयत इति भावः। अर्थेषु किं। आढ्यं कुर्वन्त्यनेन। कर्तरि
भुवः। कर्तृग्रहणे करणाधिकारनिवृत्त्यर्थमुत्तरार्थं च। अर्थेषु किं। आढ्यो भवति। अच्वाविति किं। आढ्यीभविता

© Dharmartha Trust J&K. Digitized by eGangotri

इह दिधेवयोः स्वकारो मुमर्थः। अत्र भाष्यं। इदं वइ कारादित्वमुदात्तत्वात्कृतं भुवः। अलकस्वरसिद्ध्यर्थमिकारादित्वमि
ष्णुच इति। अस्यार्थः। इष्णुचं इकारो मास्तु। भुवउदात्तत्वादिटा रूपसिद्धेः। तथा चित्वमपि मास्तु। उकारस्यात्र प्रयत्नस्व
रेणोवोदात्ततासिद्धेः। चत्वनिर्देशेन कृत्स्कः इष्णुच्यारितेपि स्विरयं न किंचिदिति व्याख्यातुं शाक्यत्वाद्येति चेत्सत्यं। अनादि
भविष्णुरित्यादौ तत्रः परस्येष्णुजं तो। तत्र परस्य कृत्योके ष्णु जिदित्याद्युदात्ततासिद्धये इकारादित्व मिष्णुच आवश्यक
अन्यथे दिङ्ग्लिष्टस्यत्वाक्षणिकत्वात्स्वरेतनस्यात्। अलंकिष्याद्विष्णुजं ते कृत्योके ष्णुजित्यस्य साफल्यात्। एवं चल
क्षणाप्रतिपदोक्तेति तदनुबंधकेति च हृद्यमपीकारादित्व सामर्थ्यादाप्येते। न चैव विशेषणार्थं चित्वमपि सकलमपिभा
ष्यकैय्यटवृत्त्यादिसर्वग्रंथराद्धांतः। न भ्रान्त्व। चित्वसामर्थ्यादेव परिभाषाद्वयं बाधितुं शक्यमिति स्वरसूत्रे। स्यापीष्णु
चो ग्रहणं ष्णुच चपि चेत्यपमिकारो व्यर्थ इवेत्याकुः। तच्चिंत्यं। चित्वेन परिभाषाद्वयं बाध्यत इति कल्पनापेक्षया लाघवा
दागमाद्यनुदात्ता इति परिभाषाया अनित्यत्वमात्रं ज्ञाप्यत इति वक्तुं शक्यत्वात्। तस्माद्यथाकारमेव रमणीयमित्यास्तां
तावत्। आद्यंभावुक इति। अजंतलक्षणाद्धृत्वा वार्देश्राः। एवं सुभगंभविष्णुः सुभगंभावुकः। स्थूलंभविष्णुः। स्थू
लंभावुक इत्यादि। स्पृशोऽनुनि वृत्तमिति। ननु स्पृशेः सकर्मकत्वात्कर्मण्युपपदे एवायं विन इति चेदत्राहुः वृत्तिकृतः
इह सूत्रे स्पृशात्कर्तरीत्यनुवृत्तं अयं सत्कर्तृप्रचयार्थं विज्ञायते तात्पर्यतः। कर्मणीतारस्यानुवृत्तस्तत्वकमितियावत्

© Dharmartha Trust J&K. Digitized by eGangotri

कर्मण्युपपदे एकः कर्त्ता। करणादौ वा पर इति कर्तृप्रत्ययः। एवं च सुबन्ते उपपद इति फलितं। न व्याख्या। यथोऽयं यत्नः
मंत्रस्य करणत्वादौ क्विप्प्रसिद्धिः क्विन्नस्य त्यपोपस्मादिति वक्तुं ब्रीहिब्रीहिवत्सादेव कुत्स सिद्धेरित्याकूः। एवं च मूले कर्मणीति
निवृत्तमिति द्रष्टव्यम्। मनुरुक्तमिति योऽर्थः। क्विन्प्रत्ययस्य तत्र विशेषणार्थेन कारः। सर्वथैवेति भाष्यकैयटादौ न
वक्तिप्रत्ययस्य कुत्सितस्तु क्विर्वा क्विबेति संदेहप्रसंगः।। व्याख्यानतो विशेषप्रतिपत्तिरिति न्यायेन क्विरेवेति व्या
ख्यातुं शक्यत्वात्। न च दृष्टं वंधकपरिभाषया क्विवंते नास्ति प्रसंग इति। इकारो वेरपृक्तस्येति विशेषणार्थः। ककारेण
गुणवृद्धिप्रतिषेधार्थः। सदृगिति। कर्मकर्त्तरि प्रत्ययः। समानमिवेमं पश्यन्ति जनाः। सोऽयं समान इव दृश्यमानस्तमि
वात्मानं पश्यतीति विग्रहे दृशिक्रिया कर्तर्यपि प्रत्ययः। दृग्दृशवतुष्विति समानस्य सः। एवं तादृक्तादृशादयोऽपि
रूपाद्यर्थानुगुणपादित्याकूः। न्यायादृगिति। न्यायमवनाम्नं इत्याकारः। नाहम् इति। इक्षेवेति वाच्यमित्याकारः। सत्सू
द्विषकर्तृच्चयार्थकर्तृग्रहणानुवृत्तास्यशोनुदके क्विन्निति। ततः प्रभृति कर्मणीति तन्नानुवर्त्तते। किंतु सुपीत्येवानुवर्त्तते
न स्याह। सुप्युपपद इति। नन्वेवं मुपसर्गग्रहणमनर्थं सुपि स्यतेन संग्रहादिति चेन्न। प्रत्यत्र सुब्ग्रहणे उपसर्गग्रहणेन
निशोपनार्थत्वात्। तेन वदः सुपि स्यत्रेवोदमदपूरे समनोनुपसर्गग्रहणानुवृत्तिं विनाप्युपसर्गे निवृत्तिः कैयटो भा

© Dharmartha Trust J&K. Digitized by eGangotri

घ्वं यथावरोधो। एतेन दद॰ सुधीत्यत्रानुपसर्गग्रहणानुवृत्तेः सिद्धान्तितत्वादिदं मुंदं प्रयोजनं भाष्यस्थोक्रमिति कौ
स्तुभोभिरुक्तः। किं वा यत्रानुपसर्गग्रहणानुवृत्तिर्न संभाव्यते। स्त्रैणानुदके किं त्रित्वोदा॰ न रूपसिद्ध्यापकस्य प्रयोजनं तेना
पसृष्टानि संसृष्टानीत्यादौ न किं त्विति केचित्। तत्र कितू किपोः कृत्वेत्वं वा विनोद्गामा बाधः ऽलुङ् तेऽनेकार्थत्वेन स
रे विशेषो बोध्य इति कौस्तुभे कृतः। श्रियायाम्यपेति निषेधाः। नित्यइति तेषां भावः। सुमदिति। पूर्वपदादिति नषः त
त्रत्वं दसोस्तनुवृत्ते आदितो यादि विषद ऽत्यत्र सुषामादित्वात्षत्वमिति धातुवृत्तौ। नुपानि बदिति। सदिरप्रतेरिति षः
ष्ठंउस्तूरिति। षूङ् प्राणिगर्भविमोचने इत्यदादिः। षूङ् प्राणिप्रसवे इति दिवादिः। षूप्रेरणे इति तुदादिः। तत्र द्विवासा
हचर्यात्सूतेरेदादिकस्य ग्रहणं न तु सुवतिसूयत्योरिति वृत्तिकृतः। तच्चिंत्यं। निरनुबंधकत्वेन तौदादिकग्रहणस्य न्या
य्यत्वात्। तस्याः प्रत्ययविषयत्वे वेत्। न हि लुग्विकरणापरिभाषया सुवतिसूयत्योरेव ग्रहणं न्याय्यं न सूतेः। परिभाषाया
लैंगिकत्वेन साहचर्यापेक्षया प्राबल्यादिति कौस्तुभे स्थितं। पुत्रिरयोगे। पुत्रसमासौ। द्वयोरपि ग्रहणं। विदद्रा
ने। विद विचारणे विदसत्तायामिति त्रयाणां ग्रहणं न लाभस्य। अकारस्य विवक्षितत्वादिति वृत्तौ। अग्रग्रामाभ्या
मिति। स एषां ग्रामणीरित्यनेन ज्ञापितमिदं। नीरूपे विषुयं वेदं। तेन कर्मण्यपि ग्रामनाय इत्यत्र न णः। पच्छुउपादि
त्यः। अग्रेभ्योपि इष्यत इति साम्येन नह्यक्षेपस्तेन सेव्यायंप्रपथस्याह। नस्माद्व्याप्यादि विरुद्धमिति दि॰। अदो

© Dharmartha Trust J&K. Digitized by eGangotri

अदोनन्ने। विटस्यादिति। जनसनखनक्रमगमो विडिति तनोविडित्यनुवृत्तेः। एतच्चेह नोपयुक्तं। छंदसीति नत्रानुवर्त्तते इत्या
करोक्तेः। अएवाधनार्थमिति। कासहूपविधिनाद्यासस्य कर्मण्युपरइत्यर्थः। अमेभ्योपि दृश्यंपते। आकारांतादमेभ्यइत्यर्थः। इह
विजुपेछंदसि। आतोमनिन्क्वनिप्वनिपश्चेति योगाभावत्वाहः प्रत्ययात्रानुवर्त्तते इत्याह। मनिन्नित्यादिना। सुशर्मेति। सुष्ठु
शृणातीति विग्रहः। प्रातरित्वेति। इणः क्वनिपि कित्वाद्गुणाभावे कृत्स्वस्य पितीति तुक्। विजावेति। क्वनिपापेत स्नुवचांवनिप
स्कान्नर्वरीतिवाइत्याद्युदाहृतं। अवावेति। णस्यात्वे अवादेशोः। रोडिति। रुषरिषहिंसायां विरुपधागुणः। सुगणिति। णसंख्या
ने वीरादिको दंतः। अल्लोपणिलोपौ। अपिशब्दः सर्वोपाधिव्यभिचारार्थः। निरुपपदादपि भवति। धीवा। पीवा। इहविग्रहणं प्रयोगानुसरणा
र्थमिति दिक्। क्किपूर्वा। अमेभ्योपि दृश्यंत इति पूर्वसूत्रानुवर्त्तते। आदंतादधातोरमेभ्योपि सुप्युपपदे निरुपपदे श्मः छंदसीभाषायां
बक्रिप्दृश्यत इत्यर्थः। एकवचनांतत्वेन विपरिणामो वोध्यः। वृत्तिकृता सहहव्यादिषेति सूत्रे प्रत्याख्यातं तत्स्मारयति। अस्येवप्र
पंच इति। नचैवमप्यत्र सुवृग्रहणेउपसर्गग्रहणं नास्तीति ज्ञापनार्थं तत्सूत्रमिति सेवं परंभाष्यविरुद्धेतेति वा। आवदः। सुपीता
दावनुपसर्गग्रहणोनुवृत्ते वनिवोढुं शाकंतेन भाष्यस्य तत्राग्रायवर्णे न मात्रपरत्वादिति भावः। उरवास्त्रदिति। ह्रंसुध्वं
सु अवस्त्रंसने। क्विपि नलोपः। वाहभ्रंडिति। वाहाद्भ्रश्यतीति विग्रहः। वृत्तोनुवहाभ्रडिति पाठः। वहस्कंधः। अन्ये

© Dharmartha Trust J&K. Digitized by eGangotri

१८ 18 षामपीति सूर्व पदांतस्य दीर्घ इति हरदन्तः। मित्रश्रीरिति। रुल्वेर्वो रूपधाया इति दीर्घः। मित्रश्रिषा वित्या दौ स्यास्मिवमीति
षः। आशास इति। अत्र वाशिषि हनरेत्यादि निर्द्देशो लिंगं। नवशास इदङ्हलोरित्येवेत्वं सिद्धं। अङ्सा हृत्वर्थेनापरस्मै
पदिनः। शास्येत्त त्रग्रहणात्। नवमेत्ति नृशास्तीति पृथक् सूत्रपदग्रहणात् सेदकृयपडि हृदिति वाच्यं। वकारेणात्रार्थप
रस्मैपदानुवृत्तेर्नृशास्त्रेवु कृतेयापरस्मैपदे दूषोय। शासिस्त स्मात् मरस्यो डितिमाख्यानात् ध्रुत एवाशास्त इत्यादौ नेत्वं प
दशास्य देशे दित्वं नार्द्रकावेवेति नियमार्थमिदं इति बोध्यं। भूरिति। प्रजादावुवङ् कवौ कवङ् इत्यादा सुभ्वामिति। श्रोः
सुपीति यण्। प्रादीनामिति। आदिग्रहः प्रकारे। अग्रेगूरिति। अग्रे गच्छतीति गमेः कौ डि इति मस्य ऊकारादेशेऽनेनैवा
कारलोपे रूपमेतत्। अग्रेवमग्रेभूरिति। ननु रुह्येकूरीति समस्या अ वुक। स्थः कवा। सुपुपसर्गे वीति वर्त्तते। नुं स्याइति। धुमा
त्येतीत्वं न। क्विपो लुप्तत्वात्। न चस्थानिवद्भावः। अल्विधित्वात्। नापि प्रत्ययलक्षणं। तस्य नियमार्थत्वेनाल्विधावप्रवृत्तेः
।ननु केवले तर्हि ईत्वमव कारादौ वितिवचनात् प्रकारी योदाहरणं प्रामाण्याद् प्रत्ययलक्षणेनेत्वं नेत्युक्तं। ननु केवले ईत्व
प्रत्ययलक्षणमस्त्वं मल्विधर्थमिति पूर्वपक्ष्म भिप्रेत्य तिबोध्यं। एव कारादावीलोगीकारे सुपीवा सुधीवेति न सिध्येदिति स ह
यामाप्यकारीये त्यादि पक्षांतरं स्वीकृतं। विध्यर्थत्वे च मित्र श्री रित्यत्रैत्वं सिध्यति। सिद्धांते तु नृशासई नृ क्विपि। ननु तः श्रीरि। नि
यमार्थमिदं। अजादौ वेरश्लेवनामत्वेति। हल्ग्रहणं च सुत्यर्थमिति। ननु सुपि स्थः क्विप्येति योगाभ्यां कक्विपो सिद्धो किम

१८

© Dharmartha Trust J&K. Digitized by eGangotri

मान्ने नेत्याद्यं क्याद्या शमिधातोरितीति । इत्थं च कक्षिपोः पर्यायेसिद्धेन इयं बाधितलाः शुद्धत्ययः स्यात् । स हि कृञोर्हेत्वादौ
टं यथाबाधन्ते एवं कक्षिपावपिबाधेत । अतस्तमवं बाधितुं कक्षिपोः पुनर्विधिरिति भावः । पक्षेवं शमिधातोरिति सर्वत्र रस्यैः क
वेतिसूत्रमस्तु । वेनाविसमुच्चितेनसिद्धं शोस्यादिति । एवं चान्तर्गणापवादयोः समानदेशत्वात्सिद्धातिदेशलाभावार्थयत्नोमास्त्विति
लाघवमितिवेन्न । अत्रं स्यादित्यत्र न नञः परस्योत्तरपदस्याद्यावश्यकाविशंतोदात्तत्वापत्तेः । किं चतेन नञ्समासे तुपूर्वपदप्र
कृतिस्वरः सिध्यतीतिनञाः । वक्तुम्नस्तुरांस्यैशं स्थिइत्यादावातोधातोरिमादालोपोनस्यात् । अवः परस्मिन्नित्यादिस्था
निवत्त्वादिष्टरूपासिद्धिरपीत्यवधेयं । सुप्यजातो । वृत्तिकृताअत्रनुपसर्गेसुपीति व्याख्यातो । सुतिष्पामाङि सत्रेरुपसंख्यान
मित्युक्तं । तन्न । अनुपसर्गसंबंधसुब्ग्रहणनिवृत्त्ययेपुनः सुब्ग्रहणं सुमात्रे यथास्यादित्येवं परं भाष्यआकोपात् । उ
सतिष्पामाङीत्यादिवार्त्तिकं तु निर्मूलमेव । इहत्यं सुपीत्यपिमास्तु । सन्नु द्विषेत्यत्रोक्तरीत्योपसर्गेसुपीत्यनुवृत्त्यासर्वेष्टसि
द्धिरित्याशयेनाह । सुपीति । आमंत्रयितेति । नाच्छील्यविवक्षायां तृन् । तेनब्राह्मणान्निमंत्रयितेत्यत्र न कर्मणिषष्ठी । उपसर्गेपीति
अनुगादिनष्ठक् । विसारिणोमत्स्यइतिसूत्रनिर्देशोपीह लिंगमित्याशयः । एतेनानेकोपसर्गपूर्वकत्वेणिनिर्भवति । मे
कोपसर्गपूर्वकइतिकेषांचित्कल्पनापरास्तेतिदिक् । साधुकारिणीति । अतएवनिर्देशादात्केरित्यत्रेनछीलान्स्थक

© Dharmartha Trust J&K. Digitized by eGangotri

साधुकारीत्युपदेशाच्चेदं ज्ञाप्यते। उक्षणिवद्गति। अत्र सर्वविधानमेवेदं। अनाब्धीत्येति। कैय्यटहरदत्तादिग्रंथेस्पष्टं। मनः। व
कुलग्रहणानुवृत्त्या मन्येतेर्ग्रहणं मन्यतेः। तेनोन्नरसूत्रे स्वशिष्यते वमवति न तु प्रत्ययसंदेहस्तदाह। मन्यतेरिति। आत्ममाने। मन
नं मानः। आत्मग्रहणं स्वपरः। कर्मषष्ठीसमासस्तदाह। स्वकर्मकइति। प्रत्ययार्थः कर्त्रपि दाग्रपदार्थसादाद्विधिः। आत्ममाने किं
दर्शनीयमानोदेवदत्तः चैत्रस्य। इकचएकाचः। अमित्यावर्त्तते। तत्रैकेनआमिति धीयते। अपरेण प्रत्ययोविशिष्यतइत्याह। स्वा
घन्वदिति। अन्यस्यामोऽभावात्असिद्धत्वाद्वस्वाद्यमेवोपमानमिति भावः। अत एव मस्यनेतत्संज्ञा। गां मन्यइति। मुमूर्द्धस्वोविधि
त्वापरत्वाद्विशेषविहितत्वाच्चाम्याकारएकादेशः। नरं मन्यइति। आतोऽतितिसूर्वर्णपदस्यगुणोरपरः। अम्विधिसामर्थ्यात्सुपोऽलि
ति न लुक्। श्नितात्तदनुः सार्वधातुकत्वाद्दिवादित्वात् श्यन्। स्वरकृतसन्निशिष्टोपि विकरणस्वरः सार्वधातुकस्वरं न बाधते इति ख
श्एव भवति। ननु नित्स्वरः। तदुक्तं सन्निशिष्टस्वरवलीयस्त्वमन्यत्रविकरणेभ्यइति। एतच्च तासेःपरस्यलसार्वधातुकस्यानुदा
त्तविधानाज्ज्ञापितं। सार्वधातुकस्वरमात्रविषयकमेतल्लिंगं न लसार्वधातुकविषयमिति भाष्यसिद्धान्तः। भूते स्यादेनतः। भुवो
निष्ठाप्रत्ययपक्षाविनो विधेयः। न च भूताधिकारं विना निष्ठायाभूतक्रियाविषयत्वं लभ्यते। न च भूतक्रियाविषयनिष्ठावि
धिविनाभूताधिकारो युक्तः। ततश्चाधिकारनिमित्ता निष्ठानिष्ठानिमित्तश्चाधिकारइत्यन्योन्याश्रयइति चेत्सत्यं। अप
मर्वंडएवभूतग्राह्योऽतिक्रान्तवाचीमविष्यद्वर्तमानव्रतिद्वंद्विनाऽर्थेन संबन्धो धिक्रियते तेन निष्ठान्तइति नोक्तदोषः १९

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र भूत इति यावदधिकारात् धातोर्विशेषणं न हि भूतता धातोः प्रत्ययं विधातुं शक्यते किं तु लक्षणया लक्ष्यार्थधात्वर्थस्यैव ।
भूतक्रियावाचिनो धातोरित्यर्थः । करणे । सोमेनेति । ऽनता विशेषणमित्यर्थः । अग्निष्टोमेनेति । अग्निष्टोमसंस्थाकेन या-
गेन पूर्वमुत्पादितवानित्यर्थः । एतच्च भावकर्मक्रियायां स्पष्टीक्रियते । कर्मणि हनः । इह वृत्तिः । इह कुत्सितग्रहणं क-
र्तव्यं । इह मा भूत् । चोरं हतवानिति । इदं च भाष्यानुक्रमपि नाद्द्र शक्तिस्वाभाव्यात्सम्बद्धमित्यर्थः । ब्रह्मभ्रूण । चतुर्विध इति
धातूपपदे कालप्रत्ययास्य चत्वारोऽपि विनिगमनाविरहान्नियम्यन्त इति भावः । तथा हि । अकृतलामूर्बब्रह्मादयस्तु दृश्याः
ततः प्रकृतिस्तावत्प्रवृत्तिः । ततः कालः । ततो विधेयत्वात्सर्वान्ते प्रत्ययः । इत्थं च ब्रह्मादिषु हन्तेर्भूते क्विप् भवतीति विशिष्ट-
वाक्यार्थः । तत्र यत्रैवकारस्ततोऽन्यत्रावधारणमिति न्यायेन नियमो नात्र भवेत्तस्य समीपस्थे भवति । ततश्च ब्रह्मादि-
ष्वेव हन्तेर्भूत इत्यवधारणे हन्तेस्तदन्तरनिर्दिष्टत्वादुपपदान्तरसंबंधनिवृत्तिफलोऽयं धातुनियमो भवति । अस्मिंश्च भू-
तत्वाश्रयणात्कालान्तरे उपपदान्तरेऽपि क्विप् भवत्येव । पुरुषं हतवान् हन्ति हनिष्यति वा पुरुषहा । ब्रह्मादिषु हन्तेरेव भूते क्विबि-
ति तु अनन्तरत्वाद्विशेषेणोपपदस्य धात्वन्तरसंबंधनिवर्तनोऽपपदनियमोऽयं । अस्मिंश्च नियमे भूतत्वाश्रयणात्का-
लान्तरे धात्वन्तरादपि क्विप् भवति । ब्रह्म जयति जेष्यति वा ब्रह्मजित् । ब्रह्मादिषु हन्तेर्भूत एवेत्यस्मिन्कालनियमेऽपि

© Dharmartha Trust J&K. Digitized by eGangotri

उपपदांतरे भूतेऽप्रत्ययांतरं भवत्येव। पितृव्यं हतवानिति मघातीति। ब्रह्मादिषु हंतेर्भूत एव क्विबिति यस्मिन्नत्र प्रत्यये नियमे
पि ब्रह्मादिषूपपदेषु संनिधान एव नाद्य। द्वितीयमाश्रयणादुपपदांतरे हंतेर्भूते क्विप् भवत्येव। पुरुषहा। शत्रुहा इति। सोपपद
श्च प्रत्ययो नियमेन निवार्यते। निष्ठा तु भवत्येव। वृत्रं हतवानिति। एवमुक्तक्रमेण नियमास्य फलानि बोध्यानि। भाष्यकृत्तु
धातुकालनियमावेवोक्तवान्। तेन भाष्यविरोधात्काशिकोक्तश्चतुर्विधो नियमोऽप्रमाणमेवेति कैयटः। यत्तु धातूपपदनिय
मो भाष्ये दूषितमिति। वित्यवादीद्धरदत्तः। धातुकालेति वक्ष्ये उपपदग्रहणं प्रामादिकं। सुकर्मपाप। कर्मणीत्यनुवर्तमाने कर्म
पापादीनां विशेषणं सोऽसंभवादित्याशयेनाह। सोमकर्मादिष्विति। त्रिविध इति। धातुनियमस्त्विष्ट इति भावः। क्विबेवेति। काल
नियमोऽसौ। कृञ एवेति। उपपदनियमोऽयं। तेन मंत्रशब्दे उपपदे धातोरंतरान्न क्विप्। किं तर्हि अणेवेत्याह। मंत्रध्याय इति। भूत एवेति
प्रत्ययनियमोऽयं। सोमे सुञः। चतुर्विधोऽत्र नियमोऽपीष्ट इति काशिका। एवमुत्तरसूत्रेऽपि। अग्निचिदिति। आहवनीयस्थापनार्थे
रिष्टकाभिर्निर्मितस्थलविशेषेऽयं समुदायो रूढः॥ कुत्सितेति। सोमघृतादिकर्मकं विक्रयणं निषिद्धमिति भावः। कुत्सितेति किं।
धान्यविक्रायः। दृशेः क्वनिप्। अन्येभ्योऽपि दृश्यते इत्येव सिद्धे क्वनिवचनं तस्मिन्निद्दृशामन्येषां प्रत्ययो मा भूदिति नियमार्थमि
दं। निष्ठा तु स्यादेव। पारं दृष्टवानिति। यत्तु विश्वदृश्वेन यज्वावयमित्यत्र विश्वं पश्यंतीति लृटा विग्रहेऽपि न क्षतिः। प्रत्ययांतर
निवृत्त्यर्थत्वमिदमिति दृशिक्रियारंभिर्वर्णितत्वादिति न्यासः। तत्र भूताधिकाराद्वाधे[illegible]पि नियमार्थतोपपन्नेन द्वा २०

© Dharmartha Trust J&K. Digitized by eGangotri

नद्याः षेमानाभावात्। मंदुरायामिति। वाजिशालायां तु मंदुरेत्यमरः। पंचम्यां। अजातौ किं। अश्वाज्जातः। पुमनुजे ति। जनि
जनिरत्र सकर्मकः। अनुरोधोपसर्जनवाचित्वात्। अप्रमेयेष्वपि। सप्तम्यामित्युक्ते। असप्तम्यामपि दृश्यते। एवमपंचम्याम
पि। न जायत इत्यजः इत्यादि। अजाता वित्युक्ते जाता वपि दृश्यते। ब्राह्मणजो धर्मः। क्षत्रियजं युद्धमित्यादि। अपि शब्द इ
ति। यत्तु अर्मंताः त्यं नाध्येति प्रघट्टके। तत्रापि दृश्यत इत्युपसंख्यायते। तद्रूतं कालमनरेणापि भवतीत्येवमर्थं न सो
ढः। अपि शब्दस्य सूत्रस्थस्य सर्वोपाधिव्यभिचारार्थत्वात्त्वहार्त्तिकमनेनैव गतार्थमित्याहुः। धातुं तत्रापीति। एते
न प्रकृतसूत्रस्थमन्येष्वपि दृश्यत इति वार्त्तिकप्रत्याख्यानं सूचितमिति भावः। क्तक्तवतू निष्ठा। ननु सतोः क्तक्त
वतोर्निष्ठासंज्ञा। संज्ञया च क्तक्तवतू विधीयेते इत्यन्योन्याश्रय इति चेन्न। सूत्रशाटकवद्भाविसंज्ञाविज्ञानान्न दोषः
समवतियस्मोमन्नस्य निष्ठेति संज्ञा भवतीति। उकावितावितौ। उदित्त्वं तु वर्थं डीव र्थं च। कित्त्वं गुणप्रतिषेधार्थं निबंधार्थं संप्रसा
रणार्थं च। निष्ठायामण्यभावकर्मणोरिति। तयोरेवेत्यत्र तयोरेवार्थयोः साक्षादुपात्तत्वादित्यर्थः। तेन यात्स्या कृ
त्यादेः करणादौ ल्पक्वाकुलकात्भवतीति चेदपि न दोषः। पुष्यु वो दीर्घश्च्छ्र इत्यत्र दीर्घग्रहणं क्षियः इति वानुवर्त्ते
तइत्याह। क्षियो दीर्घ इति। क्षियो दीर्घात्। क्षि क्षये क्षि निवासगत्योरिति द्वयोर्ग्रहणं। दीर्घात् क्षिय इति। दीर्घाज्जा दि

© Dharmartha Trust J&K. Digitized by eGangotri

त्यर्थः । क्षितः काम इति । अयं न भावे ण्यर्थात् कर्मणि क्तः । भावे तु क्षितं कामेनेत्युदाहर्तव्यं । क्रुशः । श्वित्वाद् उगन्तानां वोद
नत्वादिति प्राप्ते निषेधार्थमिदं स्यात् स्यानं । रदाभ्यां । रदाभ्यामित्यनेन तकारो विशेष्यते । ननु निष्ठा तेन तकारितमुदितमि
त्यत्र न । तदाह । निष्ठातस्येति । जीन इति । असिद्धत्वात् न स्यात् अत्र सवर्णलोके तेनेत्ययोगादेशा तदित्यस्याप्राप्तिः । गूर्न इति । उ
दीर्घो गोविन्दा इति । धातुना मनेकार्थत्वाद्धिनाशो वृद्धिः । सितो ग्रास इति । पिंडीक्रियमाणो ग्रासो दध्यादि वन्नादिश्च
नानुकूलो भवति तदा ग्रासः कर्मकर्त्ता । यस्य विभाषा । यस्य त्वा ऽधातुकायेभ्यः षष्ठी । यस्य धातोः संबंधिन आर्धधातुकस्ये
त्यर्थः । त्वदक्षमिति । उचितमित्यर्थः । कथं अक्षमिति । अंजेरेतद्रूपं । वृक्ण इति । ओव्रश्चू छेदने उदित्त्वेन वेट् त्वाद
स विभाषेति निषेधः । स्कोरिति सलोपः । षत्वे कर्त्तव्ये तत्त्वं सिद्धमिति षत्वाभावे वोः कुरिति कुत्वे कुते कार्येन त्वस्यासिद्
त्वात् । खरि । धावः । अनुपसर्गात् । फुल्लक्षीवेत्यत्र यासाहुनस्य निष्ठानकारस्य लोपो निपात्यते । नस्यासिद्धत्वान्निष्ठाव
धजनादित्वेषस्वरेण प्राप्नोति । प्रत्यये । क्षीवेन तरति क्षीविकः । निष्ठादेशस्यासिद्धत्वाद्यचष्ठ इति ठन् प्राप्नोति । इदुषो
क्षीवः । निष्ठा तल्लोपस्यासिद्धत्वादिट् प्राप्नोति । इडभिग्रहणं प्रत्याख्यातं । प्रत्ययविधिग्रहणेनैवासिद्धत्वात् । घून
इति । क्षीण इत्यर्थः । घूनमिति । विजेतुमिच्छया तत्राक्षाः पात्यन्त इति गम्यते विजिगीषा । आम इति । क्लेश्यते । आस्वद

त्पारब्धां स्त्यः प्रपूर्वात् स्त्यै ष्ट्यै शब्दसंघातयोः । अनुपसर्गात् फुल्ल । अनुपसर्गादित्यसमर्थसमासः । क्षीबादिष्विति । क्षीबृ मदे । कृ
श तनूकरणे । उत्पूर्वाल्लाघृ धातुः शक्तौ । एतेभ्यः क्तः । फुल्ल विकसन इति । एवमुल्लाघेरप्यत्र । इत्यत्राभ्यामिगुपधलक्षणे
कप्रत्यये सिद्धम् एवं प्रफुल्लादयः इति किं सूत्रेणेत्याशंक्याह । सूत्रं त्विति । नुदविदो । क्रियोऽयं प्राप्ते इतरेषां प्राप्ते उभयत्र विभाषे
यं । वेत्तेस्त्विति । तथा च भाष्यं । वेत्तेः क्तिदिदितो निष्ठाविधेर्नेति विकल्प्यते । वित्तेर्विन्तश्च विन्नश्च विनो गेव वित्तं तेरिति । तथा
त्ता । ख्याप्रकथने अयमेव हृस्वान्तो । नत्वादेशः । यत्वस्यासिद्धत्वान्नत्वाप्राप्तौ निषेधवैयर्थ्यात् । पूर्त्त इति । पूपालने । अफुर इति
ण्यन्निषेधः । उत्वं परत्वे मूर्त्त इति । मूर्छा मोहसमुच्छ्राययोः । मत्त इति । ञिमिदा स्नेहमोचनयोः । आदितश्चेतीण्निषेधः । सर्वत्रेहत्व
वित्तो भोग । भुज्यत इति भोगः । कर्मणि घञ् प्रत्ययः । शेरश्चाकर्मणि प्रत्यया विनिग्राहः । आप्तौ प्रतीतेर्वेति । भिन्नं शाकलं । कथं
भिन्नं भित्तमिति । आद्यस्य योगित्वात् परस्य योगरूढत्वात् न योगपद्येन प्रयोगानुपपत्तिः । ऋणमाधमर्ण्ये । अधमर्ण्यं दुःखप्रदमृणं यस्य
सोऽधमर्णः । ततः ष्यञ् । आधमर्ण्यं । तेन व्यवहारविशेषलक्षणायोत्तमर्णेऽपि सिध्यति । धारेरुत्तमर्ण इति लिंगाच्च । स्फीत इति
स्फीतिकामरत्ययप्रयोगः । आख्यानं संपन्नादिष्वेशः इति न ब्राः । पश्येति । निरः कुषः इति पाक्षिके इट्त्वादिति भावः । उषित इति । प- दिन
जादित्वात् संप्रसारणे शासि वसि घसीनां षः । क्षुधित इति । यत्तु संपदादित्वात् अविधि पिनाकादित्वात् जितिमा वादिभिस्तस्याः मे

© Dharmartha Trust J&K. Digitized by eGangotri

सि·र·कृ·

२२

22

षाष्ठ्युक्षितस्यमेतिप्रयोगानुपपत्तिमुक्तासमाहितं।नत्वेवमुत्वकारांतरपरमित्यवधेयं।इडितिवर्त्तमानेपुनरिड्ग्रहणंनित्यार्थं
तेनश्चायामित्यत्राप्येवं।प्रश्वेः।सृजादीनाम्इतितेनक्रादिविकल्पेऽप्राप्तेनिष्ठायांयस्यविभाषेतिनिषेधेप्राप्तेवचनं।उदित्वंनुगनार्थं
मित्याह।गमेर्लिति।गुमोविभा।तीषसहेतिविकल्पमिदं।सृडुःश्वः।अरुः।किनीतिप्रतिषेधापवादः।उत्तरार्थमिति
रहतुनंक्रासेडिति।सिद्धमितिभावः।आदितश्चेतिनिष्ठेति।आद्यव्यापारस्यातीतमात्रेणभूतत्वसंभवात्सूत्रेऽणोवासिद्धत्वादिह
सुत्पज्ञेऽनथावचरुव्याख्यायेत्यर्थः।वादितोत्ति।अन्यथाविशेषविधानेनसामान्यविधेर्बाधःस्यादितिभावः।प्रस्वेदितइति।प्रस्वे
दितुमारब्धवानित्यर्थः।भ्वादिरिति।स्नेहनमोहनयोःपृथक्।प्रत्रेति।निष्ठान्तोडीङ्ख्विदीत्यत्रेत्यर्थः।स्विद्यतेस्मेति।गात्रप्रक्षर
णार्थस्मि।ञीदितइयंनेतिहरदत्तः।जिमिदेति।अयंम्वादौनपठ्यतइतिहरदत्तः।पठ्यतएवेतिनमाः।तथाहाह्रादिवादीनांश्वेति
ष्विदादीनामादित्त्वेनीट्प्रतिषेधात्स्नेहनिष्ठानसंभवतीत्यतआदिकर्मणिनिष्ठोदाहृतेतिभावः।श्वीदितइतिनेडिति।न
नुसंप्रसारणेप्रत्ययस्थवत्केऽनेअकःइतिनिषेधेसिद्धेकिमिहश्विग्रहणेनसत्यं।अकःइत्यत्रोपदेशग्रहणानुवृत्तिज्ञापनार्थंश्वि
ग्रहणं।इदंतश्वायमुपदेशेऽश्विः।नचनदनुवृत्तेःफलाभावः।स्तातीतिनिपूर्त्तःपिंडाइत्यादौनित्यत्वादिलोपेतयोरपरत्वेवानुगंतन
त्वान्नित्वेबाधप्रसंगात्।जागरितेत्यत्रोपदेशग्रहणेऽपिनेणनिषेधः।एकाचइत्यस्यापिअकइत्यत्रानुवृत्तेरभ्युपगमादिति
भावः।एकाचउपदेशइतिसूत्रेनुअकःकिनीत्यत्रैकाजुपदेशाग्रहणागोरनुवृत्तिर्भाष्यकृतानैवांगीकृतानस्वकारश्चनेह

२२

© Dharmartha Trust J&K. Digitized by eGangotri

नेहाल्लिखने विस्तारभयादिति दिक्। ऊनइति। न चैकादेशस्य स्थानिवद्भावाद्दीर्घो न स्यात्। लोपाजादेशत्वादभावाद्दीर्घेन स्यानिवस्त्व
निषेधविरहादिति वाच्यं। संप्रसारणस्य। हलः। न भूसुधियोरित्यादिरीधीरिति विधिसामर्थ्यात्संप्रसारणपरस्त्रवरूपैकादेशो न स्या
निवदिति ज्ञापनात्तेन उुकुव तुर्जु कुवुः शुन्शुव तुरित्यादावुवङादिसिद्धं। अन्तैकादेशाभिन्नैकादेशत्वस्थानिवद्भवत्येव। तेन विश्व
पः अः। विश्वपाइति षष्ठीसमासेऽशाशादीनां तो धातोरित्यालोपः। एवं नियइः लुवः उ इत्यादिषष्ठीसमासेन्यो न्यः ल्वोल्व इत्यादी
न्येवरूपाणि भवंति न तु यौ नियइत्यादी स्यवधेपमित्यास्तांतावत्। शास्त इति। शा पीरिति गो मूढ इति। उदित्वेन वेड्यघस्याविभाषेति
नेट्। ढत्वधत्वष्टुत्वढलोपदीर्घाः। वनइति। उद्दिनो वेति क्त्वायांवेड्यं। अनुदात्तोपदेशवानतितनोत्यादीनामित्यनुनासिकलो
पः। एवं तनइत्यत्रापि। दरिद्रिनइति। न निपातिरिदरिद्रा निस्मइत्यनेन न इडुकल्पविधानादितिभावः। सुध्वस्तात इहमुंधारयोधा
तर्थोपाक्षितया नाश्रीयंते मंथादिसाधने धात्वर्थे सुव्यादयो निपात्य न इति। सुमितंमथेने तत्रापि भावे क्तस्ये टूप्राप्ति षेधः स्याद
न त्राह। समुदाये नेत्यादिना। सुध्वं गिरिनदीमिवेत्यादयः प्रयोगा अप्रसाधव एव। उपमानमाश्रित्यान्यसमर्थ्ये यतन इति केचि
तः। स्वांतं नशांतं नवाह्येषु विषयेषु अविक्षिप्तमनाः कुलंमनजन्यते। नत्रैव न तस्यरूढेः। अनायासेति। सुसमोघधंजातं न सा
दके स्विन्नासहोऽभिषुत्य पात्राय मीयते तत्स्फाटमित्यर्थः। वेदभाष्य इति। नदेनवनीतं भवति घृतं वै देवानां फांटं मनुष्या

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰ र॰ कृ॰
२३
23

णामितिशन पथ्क्रुतिव्याख्यायामितिभावः। बाढमिति। गाढ इत्यत्रे। ढत्वादिप्रागवत्। अग्रमत्रेति। मंथादेरन्यस्मिन्नर्थे। अनितस
त्वादिति। अप्रवृत्तवनिलोडिति सूत्रे। आशिग्रहणं लिंगं। छशिभ्रामी। विरूपयातंगमनं वैहृतंयस्यास विपातोऽविनीतस्य भावो वैया
त्यं। नियमार्थमेतत्। जिघृक्षाप्रागल्भ्ये। शसुहिंसायां। अनयोरादित्वस्य यस्य विभाषेति योगविभागादिड्भाव सिद्धेरित्याह। अविनयए
वेति। स्यादेतत्। धृषेरादित्वेन विभाषाभावादिकर्मणोरितिविकल्पे प्राप्ते नदंडशोसूत्रे विध्यर्थमेवस्यादित्याशंकां वृत्तिमेतमाश्रित्य
समाधत्ते भावेत्यादिना। स्तात्वंतेन। नाश्नीति। न पौर्ध्नेः अप्रयोगोऽप्रसिद्ध इतिभावः। एवं च वृत्तिमते सूत्रमेव नियमार्थमिति सि
ध्यति। न त्वंशाश्वत्यै वैरूप्यं भवति। फलं विचिन्त्यमिति। विभाषाभावादिकर्मणोरित्येतन्मूत्रा विषयाधृषेरिति भावः। तथा च हरद
त्तारीत्याऽदित्वाभावे वृत्तिग्रंथोऽपपद्यो नियमपरतया व्याख्येय इति वा ध्येयं। आदित्वस्य फलं ये तु भावादिकर्मणोर्धृषिरस्त्येव। प्रामा
णिकं वैरूप्यं न दोषायेत्याशयवानाह। माधव इति। अवैयात्यमिति। वैयात्ये तु नित्य एवेति। न धृषेः इत्यनेन धृष्टं शेम एव स्यादपकं सूत्रमि
तिभावः। दृढस्थूल। बलवतीति। मलार्थे वल्कशादि भाक्तः। निपात्यत इति। विशिष्टोपेक्षयेकदेशवचनं। कार्यापेक्षया यत्नप्रशस्तिकाभिप्रा
येणान्तस्येति। टकारस्यादेशो निपात्यत इत्यर्थः। हस्यलोप इति। ननु हस्य होढ इति ढत्वे ढे लोपेन सिद्धमिति न वेः शंकितं। तत्र।
ढत्वापवादस्य घत्वस्य दुर्वारत्वात्। तस्मात्रैवं शंका युक्ता। कं तु घत्वबाधनाय हस्य दादेशो निपात्यतामिड्भावश्च। अन्यथा तु लक्ष
णान्तरेण सिद्धमिति चेत्। टलोपस्यासिद्धत्वेन ढ्रलोपाद्यानित्यादीर्घसंयोगगुरुलोपुत्रतो हलादेर्लघोरिति रभावो न स्यात्। परिड्ढ २३

© Dharmartha Trust J&K. Digitized by eGangotri

प्यगतस्त्यत्वल्पपिलघुसर्वादिपिरोरयारेन्नोनस्यात् । इह केयटेन त्वांति नसमासानुपपत्तिरित्यादि विचार्य समाहितं तत् सर्वं नाम
धातुप्रक्रियायां कौमुदीभिरवुनावसरेस्माभिर्विचारितं । नत एव बोद्धव्यं । परिवृढस्यापत्यं पारिवृढी कन्येत्यत्र गुरूपोत्तमल
क्षणः ष्यङ् स्यात् । सिद्धांते त्विन्नंत त्वादितो मनुष्यजातेरिति ङीष् भवति । तस्मादसिद्धत्वं मा भूदिति हलोप एव निपात
नीय इति भाष्यादि सिद्धांतः । प्रभोः परिवृढः । निपातनमिति । हलोपे प्रयोजनं । भावादिकमपि प्रागवदेवज्ञेयं । कृच्छ्रगहन
कलिलानि सार्थः । कृच्छो मोह इति । दुःखहेतुरित्यर्थः । घुषिर विशब्दे । घुषिरविशब्दन इति भ्वादौ पठ्यते सवविन्नावेनेनास्येव ।।
यस्य घुषिरविशब्दन इति चौरादिकस्तस्मात् स्विवाभावं । केवलेश्च घुषिरन्नेरत्र हातत्हूति णिवाभवधानात् घुषेः पराणिष्ठा
न संभवतीति विशब्दनप्रतिषेधो व्यर्थः सन्नू ज्ञापयति णिचू घुषेः पक्षे नास्तीति । तेन महीपालवचः श्रीत्वा जुघुषुः
घुष्यमाणा इति प्रयोगेष्युपपन्नो भवतीत्याकरः । वस्तुतस्तु इदित्वेनैव णिजनित्यत्वज्ञापनेसंभवाद्विशब्दनप्रतिषेधः
सफल एवेति भाष्यादिकं प्रौढिमात्रमित्यवधेयं । विशब्दनं तु स्वाभिप्रायस्य शब्दैन प्रयोजनं । नंदेनदाह । रोदनेनापि
नाश्व मेऽश्व प्रविहूर्य इत्यत्र ब्राह्मणादित्वात्स्यञ् । प्रत एव लिंगान्नञ्पूर्वादिनिषेधोन सामीप्य इस्येव नो क्तम्
नास्ति इत्यस्या संग्रहानापत्तेः । अतोऽधपादून्नमिति न केवलस्य निपातनं । उदितो घस्य विभाषेत्यनेनेट्प्रतिषेधोपपने
रर्थासंगतेश्च किंतु केवलादाधिकस्यैवा । नवैवस्तत्वे । लिग्रहणं मर्थं सननाधिकस्यावास्यात् पटंधिकेस्य वास्यात् रथ

© Dharmartha Trust J&K. Digitized by eGangotri

तु॰ धिकस्यवेतिसंदेहेनिवर्त्तकतयानस्माफल्यात् तत्रयदिनिष्ठांतवाध्यमध्ययनमितिव्याख्येयेत तर्हिहृत्तंछंदः
हृत्तंपारायणमितितिद्धनिष्ठादित्वमित्यर्थः हृत्तंछंदसः हृत्तंपारायणस्येतिनसिध्यतिनह्यत्रनिष्ठांतवाच्यमध्ययनं
सकर्मकादधिनपुंसकेभावेक्तस्यविधानात् अपितुउक्तानुकूलव्यापारस्यरूपंतत्रहृत्तंधात्वर्थस्यकर्मतयाध्ययनंनिर्दिश्यते
तद्वृत्तमध्ययनेवृत्तिर्वर्त्ततेवृत्तिदोषोनभवतीति। नचैवंहृत्तंछंदसिइत्यादिप्रयोगानुपपत्तिः केवलस्यइतरेतरकर्मकतया
तयोरेवतस्मात्कर्त्तनेभाकर्मकेभावेक्तमात्रविधानानुपपत्तेः। नपुंसकेभावेक्तःसकर्मकस्याभावेयदिस्यात्तर्हिग्रामंगतं
देवदत्तेनग्रामगतःशाहितीयास्यादित्यनिष्ठापत्तिरितिकौमुदीसिद्धांतात् लिङ्गुकूवेतिजेननलुमतेतिप्रसंगलक्षणाप्रति
विधानुपधागुणोनेतिभावः अध्ययनइत्यत्रवाकुत्वकालकर्मणिल्युट्इतिध्वनयन्व्याचष्टे अधीयमानेर्थइति। एतेननिष्ठांत
वाच्यमध्ययनमपिपक्षोपिदुष्टएवेतिध्वनितं तादृत्तंपारायणस्येत्यादौकेवलाद्वृत्तेरकर्मकोक्तोवक्तःइतिविषयभेदेनविरोधाभा
वाद्वृत्तंछंदइत्यादौछंदःशब्दादीनांशुक्लोघटइतिवत्प्रयोगोपपत्तेरितिभावः। एतेनएवंवाध्ययनमभिधेयंभवतुविषयोव
त्तिनकश्चिद्दोषइतिकैयटोव्याख्यातः। वृत्तंछंदइति। अत्रनिष्ठायांपारजन्मोसत्वाश्रयाभिन्नेवृत्तइतिबोधः। वांतंतगांत
दमुउपशमनेशमुशांतोतमुकांक्षायामित्यादयोदिवादिश्चुरादिश्चादमुउपशमइत्यादावनेकंछंदस्यपक्षपातोज्ञापितसंज्ञः
नत्रदांतशांतयोर्ग्रहणं लोपेइट्प्रतिषेधोनिपात्यतेस्फुटग्रहणंसिद्धेवनिपातनंहापाणिनिःइत्यत्रवक्षारणार्थमितीदुभावेगोरनि

© Dharmartha Trust J&K. Digitized by eGangotri

दीत्यनेनलोपाभावः। अनुनासिकस्य क्वीति दीर्घः। दीर्घविधौ क्विलोपस्यास्थानिवत्त्वादिति भाष्यं। एतच्च यथाश्रुतसूत्र
मते। पूर्वत्रासिद्धेन स्थानिवदित्याश्रित्य दीर्घग्रहणस्य प्रत्याख्यानत्वादिति कैयटो व्याख्यातः। वस्तुतस्तु त्वैष्यादिकेन दीर्घं दी
र्घग्रहणमित्यवोचाम। पूर्णत्वोपो निपातनोद्देत्यणिलुक्। स च च्छन्दयोस्फूर्णि लोपः प्रतिषेधो मध्याकस्मात्। निपातनविष
येविषयभागकथनस्य फलं वोढ्रणां वृद्धिर्वेत्याद्यमेव। रुष्यम। रुष्ट इति। रुषिहिंसार्थः। तीषसहेति वेट्। प्राप्ते यस्य विभाषेति नित्ये निषेधे
प्राप्ते पक्षे इट् प्रवृत्ति प्रस्तूयते। अमत इति। अगमत्यादिषु। अमरोग इति चौरादिकौ न गत्यर्थे कावित्यधिकारादित्साकुरिति न आः। पक्षे
इट् प्रवृत्ति षिध्यते। तूर्णं इति। ञ्विरत्वरेत्सूत्रात्वरेराहित्वेन नित्ये निषेधे प्राप्ते पक्षे इड्विधीयत इत्याह। त्वरित इति। आदित्वस्य फलमात्म
नेपदमात्रं नत्वसाधारणमस्तीत्याह फलमद इत्यादि। संघुष्ट इति। अविशब्दे नेपि परत्वादयं विकल्प एव। आस्वांत इति। आङ्पूर्वस्य स्व
नतेर्मनसि वाच्येपि परत्वादयमेव विकल्पः। हृषेर्लोम। हृषेर्लोमकेशकर्तृकस्येति वक्तव्यं। मूर्द्धजाः केशाः। अंगोत्तरजानि लोमानी
तिभेदबोधनाय वार्त्तिकमिदमारब्धं। तयोरभेदं मत्वा सूत्रकारो लोमग्रहणमेवाकरोत्। अत एव लोमन वंस्पष्टाश्रोवं कर्त्तृत्वमि
त्युक्ते केशस्य शेऽपि श्रोवं कार्यमिति शिष्टव्यवहारः। अन्यत्रेति। विस्मितप्रतिघातलोमकर्तृकत्वानामभाव इत्यर्थः। उदितस्तु घटो
नष्ट इत्यर्थः। चायतेरिति। चायृपूजानिशामनयोः। क्ते चिविकल्पेन चिभावो निपात्यत इत्यर्थः। क्तिनि नित्यं चिभावो वक्तव्यः। अ
पचितिः। प्यायः पी। स्फायः स्फी। निष्ठायां विभाषा प्यायः पूर्वस्येति सूत्रात्सप्तम्यां निष्ठायां विभाषेत्यनुवर्त्तेनेत्याह। नास्यानिष्ठा

© Dharmartha Trust J&K. Digitized by eGangotri

यामिति। पीनइति। ओप्यायी वृद्धौ। ओदितश्चेति निष्ठानत्वम्। पीनः। स्फिरितत्वाति निषेधः। अमन्त्रेति। इह छन्दसि विकल्प इत्यर्थः। स्यादेवेति
मवस्थितत्वाद्विकल्पस्यानित्यमेव प्यीभाव इत्यर्थः। प्रप्यान इति। प्यादीसुखेन। इदित्वान्न लोपः। घनिस्येति। क्रियानिर्देशो धातुविशेषणभावार्थः
न हि तेन विना रूपं सुलभमिति न्यासः। धीतमिति। प्रसादकारकं यङ्लुङ्निवृत्त्यर्थः। दाददत्र इत्वाद् लोपाभावे उच्चारणार्थं स्य दथ आदेशः। मासी
नः घुमास्थेतीत्वे ऽनुदात्तोपदेशात् हि न तत्र। यङ्लुकि इटादावितः स्यामित इति रूपस्येव न्याय्यत्वात्। तत्रेति किन्तीति विवक्षितत्वात् मासीत्व प्रसङ्गः। अप्यु
पेत्यापि ब्रूमः। दथ आदेशोऽनेकाल्त्वात् सर्वादेशो न्याय्यः। इहं ते यङ्लुगन्तस्येव दधातेरिति हि दूषणं च कुश्च। तत्रायं समाधिः। इत्वनिवृत्ति
वृत्त्यर्थात् प्रियदेशादिदुभाउभावे निमित्तस्य तादि किति तः सत्वे दथभावे इत्वे वेत्यन्तद्वयं सुलभमेव। अन्यथा त्वादयवादौ सो मा स्या
मित्येव स्यात्। दथभावोऽपि तिकिति परे विधीयमानोऽसहितस्योत्तरं एवं उस्येव युक्तो न सर्वादेशो हि नलुकि वधादेशो ऽप्येवमिति विभा
वयं तु सुखियइति दिक्। दधातेर्हिः। नित्य पानिर्देशो धेटो निवृत्त्यर्थः। तीत्यनुवृत्ते यङ्लुकि न दाधिनः। अत्रापि प्रसादे क्रियानिर्देश
स्य यङ्लुङ्निवृत्त्यर्थत्वात् दाधीत इति घुमास्थेतीत्वमुदाहृतं। नत्र पूर्ववदेव हेयमिति न्यासः। प्रसादसमर्थनमपि पूर्ववदेवेति व
पं। क्षोददधोः। इहादेशास्तदधान्तो न किन्तु थान्त एव। संहितायां कस्य त्वेपि रूपे निष्ठ प्रसङ्गादिति प्राञ्चः। तदनुस्वारेणाचष्टे द
धः स्यादिति। निर्दिष्टे तु तान पिस्यापयितुमाह। तान्तो वेत्यादिना। अवउपसर्गान्तः। अवदत्ता वत्ते। तत्रैके नपञ्चम्यन्तेनोपसर्गो विशे
ष्यते। अपरेण षष्ठ्यन्तं स्यानिला भाष्यमिति व्याचष्टे। अजन्तादित्यादिना। अवदत्ति। अवः स्थाने इत्यर्थः। अवदत्तमित्यादि। आदिकर्म
णीत्येतत् प्रदत्तमित्यस्य विशेषणमिति न्यासः। धीतमिति। दधाते हिं न धेटो नापि दथ आदेशः। इति तत्रोक्तत्वात्। अवदानम्

© Dharmartha Trust J&K. Digitized by eGangotri

सरोऽस्तरीति। वैकल्पिकोऽनेनाभ्यस्तोपदस्यार्थः। प्रकृत इति। प्रकर्तुमारब्धवानित्यर्थः। प्रकृतः कटस्तेनेति। कर्मणीह क्तः चैत्रनिष्ठाद्यापार
जन्यो यस्तस्याश्रयाभिन्नः कटः कर्मप्रत्ययेषु फलव्यापारयोर्विशेषणविशेष्यभावव्यत्यासाभ्युपगमात्। नदीष्ठ इति। नदीस्नाने कुशल इत्य
र्थः। अम्बते इति। सूत्राद्वाक्यत्वेनास्य दाद्योरिति विकल्पनिषेधो भवत्येव। कृष्टलमिति। ग्रामिष्ठलं। परिष्ठलं। गत्यर्थाकर्म। आदिकर्मणि क्तः
कर्तरि चेति सूत्रात् क्तः कर्तरीति पदद्वयमनुवर्त्तते। तदेतदाह। कर्तरि क्त इति। सोऽत्र वक्तुः सुफलमाह। भावकर्मणोरिति। गंगां प्राप्न इ
ति। प्राप्तवानात्मानं प्राप्नोः। इह सूत्रे प्राप्तिरपि गतिग्रहणेन गृह्यत इति भावः। ग्लान इति। ग्लै हर्षक्षये। अकर्मकः। शेषमधीति। अधिशीङ्
स्थासामिति कर्मसंज्ञा। हरिदिनमिति। उपान्वध्याङ्वस इति कर्मता। निष्ठायोगे षष्ठीनिषेधाद्द्वितीया। उपोषित इति। वसतिक्षुधोरिती
ट्। यजादित्वाद्वस्योत्वं शासिवसीति षः। पक्ष इति। भावकर्मविवक्षापक्ष इत्यर्थः। मुकुंदस्येति। आस्यते मया इत्यासितं आसनमिति भा
वे। यातं मुकुंदमित्यत्रापि एवं विग्रहो दर्शनीय इति भावः। अधिकरणवाचिनश्चेति त्रिसूपि कर्तरि षष्ठी। रमापतिरिदमिति। इदं पदार्थनिष्ठ
संयोगजनकयानाश्रयाभिन्नो रमापतिरिति बोधः। क्षिप्त इद्ध इति। आदितश्चाभीदित इति नेड् इट् इति। तीषसहेति पाक्षिके इट्। त्वा घस
विभाषेतीट्। न इंसकेऽप्यवा। नयोरेवेति सूत्रेऽभूते क्त एव। तस्येतेन तस्मा विनिकेवित्। तत्रा। अस्मापि क्तस्य तत्र ग्रहणमिष्टमिति केऽप्यटमतमि
तिणोरध्ययनेमिति सूत्रे सिद्धांतितत्वात्। अन्यथा यामं गते चैत्रे णोति ग्राम इत्यत्राशुद्धिर्द्वितीयापत्तिरिष्टैवेत्याद्यैवामेति दिक्। एवं तावन्निष्ठासंबंधीडा
गमतन्निषेधकिं ताकत्वादिति विधायकानि निष्ठाधुमाहमिक हैमीयीकसूत्राणि सप्रपंचानि प्रसंगादभिधाय प्रकृतनिष्ठासूत्रेऽत्रैरं सूत्रं गा
वष्टे। नुपजोरिति। सुनोतेरिति। सुप्रसवैश्वर्ययोरिति तेन तस्मिन्ननुबंधकस्यानग्रहणमनभिधानादुभयपदिनासाहचर्यात्। क्तः। ऊनि

© Dharmartha Trust J&K. Digitized by eGangotri

विति। पित्वं तु कृत्स्नार्थम्। ङित्वं गुणनिषेधार्थं। छंदसि लिङ् इत्यादि त्रिसूत्री छांदसी तस्याः इह लेखनं भाषायामसदवसेत्यादिसूत्रद्वयस्यो
पोद्घातत्वेन निबोधा। तत्र भूतसामान्ये लिङ्विधानार्थमाद्यं सूत्रं। अहं सूर्यमुभयतो ददर्श। अहं द्यावापृथिवी आततान। नन्वछंदसि लुङ्
लिट् इत्यनेन गतार्थता। धातुसंबंधाधिकारे सति विधिरयं त्वविज्ञेषेणेति वैयर्थ्यात्। लिटः कानज्वा। यो अग्निं चिक्यानः। वृकृणं सुषुवाणः। ना
ग्रहणात्कुचित्ता। अहं द्यावापृथिवी आततान। अहं सूर्यमुभयतो ददर्श। भाष्ये तु संनिहितत्वात् लिट एवैतावादेशौ नित्यौ स्तः। छंदसि
लुङ् लङ् लिट इति विहितस्य संनिहितत्वादादेशौ न भवत इति लिङ् अवर्णां भविष्यतीति वाग्रहणमिह व्यर्थमित्युक्तं। केचित्तु अनेन बोत
रार्थत्वदिति व्याख्यानं। ननु प्रकृतं लिट्ग्रहणं तस्य विपरिणामेन षष्ठ्यंततोपपत्तेरिह लिड्ग्रहणं व्यर्थमिति चेत्। सप्तम्यंतत्वे वा
कानिवृत्त्यर्थमिति भाष्यादेः स्वरसः कोऽस्य भकृतश्च। व्याख्यानतो विशेषप्रतिपत्तिरित्येवतो द्रष्टव्यं काकानिवृत्तेः सुवचत्वान्नेदं सम्यक्। किं तु लि
डभावस्य यथा स्यात् योऽपि परोक्षे लिट् तस्याप्ययमादेशो भवतीति नन्दनर्थं नतिरिति जयादित्यः। ननु कानच्क्वस्वोः कित्वं व्यर्थं। असंयोगा
ल्लिट् कित् इत्येव सिद्धत्वात्। न च ऋच्छत्यृतामित्यस्य पद्धधानस्य रोदसी अंजेशजिवा नित्यादौ संयोगांतार्थमिति वाच्यं। छंदस्युभयथेति सार्वधातुक
संज्ञकत्वेन ङित्त्वात् उपोषयपदोरिति चेत्। कित्त्वि लिटि नेरन्तुस्तेरितस्ते नत्सिध्यर्थमारम्भमाणस्य छंदसि तृतामित्यनेन च लक्षणस्य गुणस्य बाधना
यपुनः किल्करणात्। तेनेति निरुक्तिः एवानित्यादि सिद्धं। त्रिमुनिमतमिति। सूत्रकारेण छंदसीत्युपक्रांतत्वादुत्तरसूत्रे भाषाग्र
हणाच्च। भाष्यवार्त्तिककृद्भ्यां क्वसुकानचोश्छंदस्युभयथेति सार्वधातुकत्वमंगीकृतमित्यनुपदमेवोक्तत्वाच्च। एतेन किल्करणसाम
र्थ्याल्लोकेपि क्वसुकानचोः साधुरिति केषांचित्कल्पनानादर्त्तव्येति। हरदत्तमाधवादिग्रंथेषु स्पष्टत्वात्। स्पष्टाक्तेतिमावः। कवयस्त्विति

२६

© Dharmartha Trust J&K. Digitized by eGangotri

साध्वसाधुविभाजकव्याकरणात्मकंधर्मशास्त्रमनादृत्य लोके ह्यलपृच्छन् यच्छ्रो हो शुद्धविकल्पेति भावः अत्र प्राचा दाघ्या घ्राका ऽन्योद्ग्रं श्वेनिमृत्त्वमु
पन्यस्तः तच्च हृत्यादौ लोके वेदसाधारणमिति निपद्यपिस्थितं तथापि होवेद्धितं तस्य ग्रहस्य विधाकप्रकरणस्थत्वाभावेन ककुविधायकत्वा
भावात्। द्वित्वाभावादिनिपातनमात्रेण साफल्यात् क्रुसोश्चुं दसत्वनिश्चयात् तत्कानि त्यादीनावेद्रश्च व प्रयुज्यमानत्वाच्चेति भावः तत्वेकाज
त इहे का न्वमुपदेशो विवक्षितमुतद्वित्वोत्तरं। नाद्यः। विविद्धान् विविद्धानित्यादावि प्रसंगात् किंच एकाज्ग्रहणमेव व्यर्थं स्यात् भाव
त्वाभावात् न रुकृते द्वित्वेनेकाजूधातुरस्तियदनेनस्या वत्संभवात्। न द्वितीयः जिघृक्षतेः याम्ना वत्सीः ते प्रोलिखने काकेनामोऽ दुर्वरत्वात्
न बोषविदत्याम पक्षे ऽभावाजागर्जिघविश्वः न वेकमुदाहरणं व्यावर्त्यमिति न्यायात् अन्यथालागर्ते नेति न्यायात् तस्मादे
काज्ग्रहणसामर्थ्याद्द्वितीयएवपक्षो युक्त इत्याशयेनाह। कृतद्वित्वानामेकाचामिति। अथ दत्तग्रहणमपनतएवनमर्थमिति बोधे
ननु घसिग्रहणमर्थं कृते द्वित्वे घसिम सोर्हल्ली सुपधालोपे घ्यासकारमा दाय एकाज्त्वादिट् सिद्धिरिति चेन्नैवं। घस्वसू इति स्थिते
द्वित्वास्य रत्वादुपधालोपे न कृत्वाद्द्वित्वमेवेनस्यात्। प्रसन्नीद्वित्वं वचने ऽचीति स्थानिवत्त्वं निवत्त्वं विरहात्। नच पूर्वस्मादपि वि
धौ वितस्य लोपस्य स्थानिवत्त्वादिदं भविष्यतीति वाच्यं स्थानजपेक्षया पूर्वत्वेन हृस्य घकारस्यानिमित्तत्वेनाश्रयणाभावेन स्थानि
वत्वाश्रयः। घसिग्रहणं तु तत्सामर्थ्यात् पूर्वविधि अजोपस्य स्थानिवत्त्वाद्द्वित्वे ज्ञापितवान्निति सिध्यतीत्यभिसंधायाह। घसेश्चेति।
इत्यत्र नियमस्य वाचो विधिमुखेन प्रवृत्तिरिति पक्षे बोध्यं। पक्षान्तरे तु घसिग्रहणं व्यर्थमेव। एतेन न तत्र प्रवृत्तिमन्तेण क्रियादिनियमा
द्। ऽजादित्वानि निरूपसिद्धेनिवर्धित्वात्। वसादिनाम्नेव स्वित्स विभक्तिको निर्देशः ८३ तत्र्तिपपतीनामि स न ऽ इत्यनुवर्त्त

© Dharmartha Trust J&K. Digitized by eGangotri

सि॰र॰कृ॰
२७
27

नेमत्याह अनुवादोऽयं विधेयान्तिनरनिवृत्तिरेवेत्याह नाम्नेषामिति। आदिवान्‌ आदिकानि तादो वुपुविवयेष्विवेत्सादाविवक्वादि
नियमादित्सिद्धे नियमार्थमेवेतदित्तिसिद्धान्त इत्ति भावः। भाषायां सदवस क्वसुरिहानुवर्त्तते न कानच् श्रेतिपृथक्‌सूत्र
करणात्‌। वाग्रहणमनुवर्त्तमानं न क्वसुना संबध्यते। किं लादेशत्वाविशेषानुमितेन भूतसामान्यलिटा तदेतदाह लिडः स्यादिति तथा
च भूतसामान्ये सदादिभ्योऽनुमितविधिप्रापितेन विशेषविहितेन लिटा लुङ्‌ न बाध्यते किंतु पक्षे सोऽपि भवत्येवेत्यर्थः। तस्य च लि
टः स्थाने कसुरादेशो नित्यमेवेत्याह भाष्ये नाह। नित्यं क्वसुरिति। अत्रायं निष्कर्षः। लुङ्‌ उत्सर्गः। तस्यापवादः सदादिलिडपवादः अनद्य
ने लङ्‌ परोक्षे लिट् इति लुङ्‌ सूत्रेऽपवादाः संपन्नाः। तत्र सदादिभ्योऽनद्यतने लङ्‌ लिटौ विषये पि पूर्वविप्रतिषेधेन पक्षेऽनुमितः सदा
दिलिडपीष्यत इति। अत्रायं भाष्यार्थसंग्रहः। सदादि लिड्‌ भूतमात्रे लुङ्‌ लङ्‌ लिड्‌ विषयेऽपि वा। सदादिभ्यस्तु पक्षेऽपि तेन रूप वतु
ष्टयमिति। किं च परोक्षे लिट् लिड्वादेशोऽनेक क्वसुः। तस्य कादेशविधावनुपपत्तेरिति भावः। यत्तु जयादित्येन सदादिभ्यो धातुभ्यः
परस्य लिटो भाषायां विषये वा क्वसुरादेशः स्यादिति वाग्रहणस्य क्वसुना संबंध उक्तः। तन्नेत्युक्तरीत्या भाष्यविरोधात्‌। उपसेदिवान्‌ कौ
त्सः पाणिनिं। लुङि। उपासीदत्‌ कौत्सः पाणिनिं। लुङि उपासदत्‌। परोक्षे लिटि। उपससाद कौत्स इत्यादि। एवमनूषिवान्‌ कौत्सः पाणि
निं। अन्ववात्सीत्‌। अन्ववसत्‌। अनूवास। उपशुश्रुवान्‌ कौत्सः पाणिनिं। उपाश्रोषीत्‌। उपाशृणोत्‌। उपशुश्राव। उदाहरणानि
निवेदुषीमिति। क्वसोः किं त्वा कि लिङ्द्यो त्वाभ्यासलोपो। वसोः संप्रसारणे वउ आदित्वविरहान्नेट्‌। उगितश्चेति ङीप्‌। एतेन किलो दित्व २७

योः फलमपि सूचितमिति बोध्यं । उपेयिवाननाश्वाननूचानश्च ॥ कसोश्छिते एकादेशोः कृते इट् पूर्वत्वादेशोनि पात्यते कृतद्वित्वस्येकात्वादि
ष्टमिच्छन्ति । यद्वा इड्वसाविति स्थिते एकादेशं बाधित्वा दीर्घइणः कित्यभ्यासदीर्घे कृते उरदत्वं हलादिः शेषः परतो यकारादेशो निपा
त्यते इति द्वौ पक्षौ भाष्यस्थौ । कृते द्वित्वे ऽनेकाच्त्वादिडप्राप्तेर्निपात्यत इति पक्षो भाष्ये ऽनादृतः । उपेयुषेत्यादावतिवा ऽस्य यद्यपि वहूवि
नस्तथापि वस्वादिविकल्पः एवं तद्विधिः कृता नित्यं प्रतिषिद्धः क्रादिनियमात्प्राप्तो वसोरेकाजादिति नियमात्पुनः प्रतिषिद्धोनेन
निपातनेन समएवेट् प्रतिप्रसूयते नाश्वेविद्याद्वित्वाननुपेदइत्येनिपात्यते इतिनाजादिष्टप्रसंगइतिकेचित्तः इतिपक्षत्रयं मनसि
निधायाह । इतिन्यासः । उपेयिवाननुपेयिवांश्च उपेयिवद्धि उपागात् । उपेतः । उपेयायेति । अविवक्षितमिति । व्याख्यानमेवात्र
शरणमिति न्यासः । वसावेव इरादेशो निपात्यत इति दीर्घाद्यादेशापरं भाष्यं प्रमाणमित्यवधेयं । वेत्तेः कर्त्तरीति तु भावकर्मणोः
लटः शातृशानचौ सामानाधिकरण्ये सतीति । लटः शानच् सामानाधिकरण्याभावे विधीयत इति नान्जंतवोक्तं न ह्ना मा स्यादिति नोलटोपि तद्भ्यः
ते । प्रथमं तमिति । विक्लित्तेनु लट्वर्त्तमानमाचारान्तः प्रथमसमर्थः । प्रवर्तीति विग्रहः प्रत्ययाविर्धाषष्ठाप्ते ना आख्यातं किपापद्यान मिति
णच्चं नादिति न्यासः । आने । अतो येय इत्यतो ऽनुवृत्तं पंचम्यन्तं षष्ठ्या विपरिणम्यते । आन इति सप्तमीनिर्देशात्तानवेभय निर्दे
शोपवमीति निर्देशस्य वलीयस्त्वं । सप्तम्या निरवकाशत्वात्तदाह । अंग स्यात इति । अंगावयवस्येत्यर्थः । अदन्तागस्येति प्रावो व्याख्या
नेनूपेक्षितं । पचमान इत्यादावदुपदेशाल्लसार्वधातुकमिति शानचः स्वरस्यासिध्याप्तेः । ततश्चेह अंगावयवो मुकः स्व

तदेवनमवद्धयात्। तदवयवमकारं तु यवदध्यादेवेति। स्वरविधौ व्यंजनमविद्यमानमिति चेन्न। अग्निविलासो मस्तु त्वानित्या
दौ कस्वनुटूप्सा मनुविति स्वरनिवृत्त्यर्थं स्वरविधावित्ति रूपपिला हल्स्वरप्राप्तादिविस्पभाष्यकृता स्याप्तित्वात्। अष्टकेति। भाष्ये
तु नन्वोर्विभाषेत्यतो मंडूकप्लुत्या विभाषाग्रहणमनुवर्त्य व्यवस्थितविभाषा विज्ञाना यथा शिष्टप्रयोगमिष्टसिद्धिरित्युक्तम्।
अप्रथमासमानाधिकरणग्रहणं तु नत्वा सामानाधिकरण्ये नित्यमेवादेशो भवतः तदभावे त्वेकोविकल्प इत्येवमर्थं तदेत
ध्वनपत्राहाक विदिति। सन्निति। अस्ति त्वाम्ल यत्र पुत्रा हर्ये। उपलक्षणं चैतत्तेन कुर्वतो पत्ये कोर्वतः। कोर्वताः। पवत्कस्सः
पवमानतरः। वै स्नमानाः। कुर्वतो भक्तिः कुर्वद्भक्तिः कुर्वाणभक्तिरित्यादि पत्तयोरुत्तरपदयोरपि सिध्यतीति। विभाषाग्रह
णादित्यनुवर्त्तनादेवेह न भविष्यतः पचतितरां पचतिरूपं पचतिकल्पमित्यादौ। लक्षणहेत्वोः। शमानाभुंजत इति। ज्ञापनेन
भजिक्रियालक्ष्यत इति ज्ञापनं भुजिक्रियालक्षणं बोध्यं। इह बतिष्ठ सूत्रयतीत्यादौ पदास्यानादिना सूत्रक्रियालक्ष्यते तेन
दास्सूत्रेणादेशासिद्धिः। बकुसुमसूत्रयत्युक्त्यैवं दरतु केपि तिष्ठ सूत्रयतीति प्रत्तिवचनेवैत्रः कारकं लक्ष्यते तेन दानसूत्रेणादे
शासिद्धिरिति गुणोपसंख्यानमिति वचनं कर्त्तव्यं हेतावाह अर्जयन्निति। अर्जनं वास हेतुः। पश्यन्निति। हरिकर्मकं दर्शनं सु
। के हेतुरित्यर्थः। लक्षणहेतू क्रियाविषयो भवत इति किमर्थं तयोर्द्रव्यगुणादिषक लेमाभूत्। यः कंपते सोऽश्वथः। पटुश्लवत
तल्लघुहन्ति जयादित्यः। गुणोपसंख्यानमिति भाष्यप्रत्याख्यानमिति भावः। विदेः शतुः। वेत्तस्याविवत्वादेवागित्वसिद्धेपुन

© Dharmartha Trust J&K. Digitized by eGangotri

रुद्धिसामर्थ्यान्न तदनुबंधकपरिभाषाबाधात् सोः संप्रसारणमित्यत्र कुसोरपि ग्रहणं भवति भाष्ये तू कारउच्चारणार्थः आनु
र्वसुः समासेऽनञ्पूर्वे इत्यत्र द्विसकारनिर्देशमंगीकृत्य संप्रसारणमुभयोर्ग्रहणमित्युक्तं । शुउ यजोः । आनतूवानञ्ञाइ
ड़ः धायोः च्यवनावणेनेत्रयोपि ग्रुत्याद्विवत्स्वनंत्रीः । नतुज्ञात् ज्ञानवावेवलादेशः नथालेवेतिवक्तव्यं स्यात् । एवंनेप
जनेरिति निर्देशोपि यथासुः । वासरूपविधिश्च लादेशे नास्तीत्युक्तं । किंच लादेशत्वेपि भाकर्मणोपि स्युः कर्तर्येवविधाने
च अपि च कृतीह पवमाना इत्यत्र चानश्चितदुपदेशात्परं लसार्वधातुकमनुदात्तमित्येष स्वरः प्रसज्येत । चित्वसामर्थ्या
नाइत्यत्र श्यो लुक्सिसावकाशत्वात् । यत्तु शानचो लादेशत्वे उ सार्वधातुकानुदात्तत्वमापाद्येत । तन्न । निरवका
शत्वेन चित्स्वरप्राबल्यात् । किंच शानचो लादेशत्वे आत्मनेपदसंज्ञात् । ततश्च निघ्नाना इत्यत्र परस्मैपदिनश्च शानश्
नस्यात् । न चैषां लादेशत्वाल्लादेशत्वे सोमं पवमाना इत्यादौ कर्मणि षष्ठी दुर्वारेति वाच्यं । न लोके सत्र तृन्नितिप्रत्याहारग्र
ति भाष्यादिसिद्धांतात् । नचैवं चोरस्य चोरं वा द्विषन्नित्यत्र दोषः । द्विषः शतुर्वा विवचनमिति सुक्तत्वादिति दिक् । सुञो यज्ञ
पज्ञे न संयुज्यमाने ऽर्थे वर्तमानात्सुनोतेः आत् प्रत्ययः स्यात् । सत्रिण इति । आसनोपायचोदनाचोदितोपागविशेषः सत्रं
। तत्र ये यजमानास्ते ऋत्विज इत्येवं श्रुतिः । संयोगग्रहणं प्रधानीभूतकर्तृसंप्रत्ययार्थं । ऋत्विक्षु माभूत् यज्ञ इति किं । सुरां
सुनोति । अर्हः प्र अर्हन्निति इह भवान्द्विषा पूजामित्यवाचोषः । प्रशंसायां किं अर्हतिचौरो वधं । आक्रोशच्छोलः । आजमा

© Dharmartha Trust J&K. Digitized by eGangotri

धुर्विधुतो जीनिक्रियं वक्ष्यन्ति न मभिव्याप्य । = प्रभिविधावसा वाङ् । नेनसोपि मधीत्यादिषु भवतीति बोध्यं । न्यायादीनां त्रया
णां विशेषणीभूतो धात्वर्थस्त्विभिलषितैः परामृष्यते । तच्छीलो यः स्वभावतः फलनिरपेक्षः प्रवर्त्तते । तद्धर्मा चारः स्वधर्मो मि नदा
ममायमिति प्रवर्त्तते । तत्साधुकारी शीलेन विनापि धात्वर्थं यः साधु करोति सः । उदाहरणान्यत्र बोध्यानि । अलंकृञ् । ऽइष्णु
सिद्धः करोति गृह्यते तेन हिंसार्थकः । प्रभृत्यादयः प्रत्येकमुपसर्गाः पठ्यन्ते उपसर्गान्तरनिवृत्त्यर्थं । तेनूसमुत्सितिस्नुरित्यसदिषु
रित्याद्युः । उत्पतेरेवात्र पाठ इति दांतपाठं प्रत्युत्पतिष्णुरित्यादिस्नुरिति वा । पारिशेषवदिति । अयामर्तेति णेरयादिः । भुवे
श्चायोगविभागउत्तरार्थः । उत्तरसूत्रस्य वग्लोश्चेन भवतिरेवानुकृष्यत इति भावः । एतदर्थमेवेह छांदसमसूत्रद्वयस्यैकेखनमू
न्निरंकुश इति । व्याकरणज्ञानशून्याय इत्यर्थः सो धूनेव प्रयुंजीतेत्यादिनियमभज्ञानादिति वा । नैतदिति । तस्यानुकर्षसमुच्चया
र्थमित्यर्थः । निगदमिति । तथा च वार्त्तिकं । कृत्स्नोजित्वान्तस्येकारः क्ङितोरीत्वशासनात् । गुणाभावस्त्रिषु स्मृतो । निरको
रितिगकारेतिगकारवर्णस्यासिद्धत्वादुत्वं प्राप्तं सोत्रत्वान्न । ग्रस्नुरिति । नेड्वशिकृतीति नेट् । ग्लाजिस्थश्च । इति णिचपर्थः
धित्वमुत्तरत्र संपक्यादो कुत्वार्थमिति तं रुदृपर्थं । अनुवंधइति । एवं वहत्रिं ग्रंथो भाष्यविरुद्धत्वादप्रमाणमेवेति भावः । चोक
षा कषछिद्वसार्थः । लसश्लेषणक्रीडनयोः । कथाठ्यो घापां । स्वभु विश्वासे । प्रमाधीति । मथविलोडने । प्रवासीति । वसनि
वासे अस्यैव ग्रहणं । न त्वाच्छादनार्थस्य । लुग्विकरणत्वात् । निंदहिंसा बुक्साद्यादिति । तच्छीलादिषु कर्त्तृष्विति बोध्यं । अत्र वि
नाशेति विपूर्वस्य नशोऽर्पितस्य भाविनाणिलोपेन निर्देशः । अकारस्तूच्चारणार्थः । केचित्तु विनाशी नित्ययपनमेवपठंतुः

© Dharmartha Trust J&K. Digitized by eGangotri

४

१रिवादीनिति णिजंतं तदितिस्पष्टमूः । अप्रसूपेति कण्ड्वादिपठितः । सूत्रे समाहारद्वंद्वे सौत्रं पुंस्त्वं । ननु अप्रत्यये रेव अनुदात्ते विक्षेपः आधृषाद्वा
र्थ एवुल्लितु मध्योदात्तत्वं स्यात् । नंद्यादिभ्यस्तु ण्वुलेवास्तु । न हि तेषां ण्वुलि तुजिवासरूपेत्वे रवादिविज्ञोषोस्ति तत्राह । ण्वुलासिद्ध
ति । तृजादयो नेति । न केवलं ण्वुल्विषयकमेव लिंगं किंतु तृजादिप्रत्ययमात्रविषयकं भाष्यप्रामाण्यादिति भावः । देविकुर्वोः
तच्छीलादिषु कर्तृषु स्थितेव । दाधातेर्हेतुमंतण्यंतस्यादिवा । अकृतं अनेदितिवुणादित्यंतस्य वग्रहणं । आहेत्यनदिति । आहेत्याहेत्यनदितिवुग
दो । अनुदात्तेतश्च । तच्छीलादिषु कर्तृषु । इहादिग्रहणाभावे हलंतादित्यर्थः स्यात् । ननु तश्चानु गुप्तो मीमांसक तदेति नेस्यात् । अत्र
नुदात्तेत्वमिहास्ति । अवयवे चरितार्थमिति न्यायेन संतनामनुदात्तेत्वाहानेः । अकर्मकादिति सुव । तसितापस्त्र । अनुदात्तेतः
किं । भवितादृत्वादेः किं । एधिता । जुत्वक्रमा । क्रमद्रमीयड्तौ । वर्तनार्थनामिह ग्रहणं सकर्मकार्थं । पूर्वेणेति वर्तनार्थकत्वाद्दु
दात्तेत्वादसमर्थः । परस्परमिति । निंदादिसूत्रे तु तच्छीलादिषु वासरूपविधिना तृजादयो नेति ज्ञापितं । अत्र तु ताच्छीलिकेष्वन्यो
न्यं वासरूपविधिर्नेति ज्ञाप्यत इति विवेकः । स्यात्तूनेति । तृजपि न । पूर्वोक्तज्ञापकात् । तेनालंकरिष्णुरित्येव तच्छीलादिषु भवति । न यः
वयतगुणापगतादिविसस्यनयनेनेदं ग्रहणं । अनुदात्तेत्वादेव सिद्धे रतो नेति पृथक्पदं तदाह । यकारांतादिति । क्रूयितेति । क्रूयी
श्राद्दे तुंदे वास्मायी विधूनने । तनयी । सूद दीप । अनुदात्तेत्वादिति प्राप्ते पुनर्नेत्यर्थः । ताच्छीलिकेष्विति । परस्परमिति भावः । वाधिक
मिति । न केवलं यथाश्रुतभाष्यानुरोधेन तुजयोरेव समावेश इति मंतव्यं । किंतु वाधिकत्वएव भाष्यस्तात्पर्यं । तेन गमेर्लभ्यत
पदे तुकग्नविषये तत्रापि गंता कोमुकः । बीकषलषेति श्वि ण्युन्विषये युज पिविकसीविव्वत इत्यादि सिद्धमित्याहुः । जत्रभिरि

© Dharmartha Trust J&K. Digitized by eGangotri

जल्पयुक्तायां वाचि॥ मिस भिक्षायां॥ कुद छुद दने॥ लुंट स्तेये॥ एतौ तुदादी॥ वौकषत्ठसे त्रिषि नुशिबुषयेजुजपिविकुक्षीवि
कक्षन्॥ वराक्राति॥ बिलान्नी॥ षू॥ जिद्क्षिवि॥ जिजर्घापिमवार्थः॥ द्रदु॥ आदरे॥ क्षियक्षयेक्षि निवासगत्योः॥ विपूर्वः श्रिस्त्रीवीयां
नम्नूवेयिथमपसंवलन्धाः॥ निपातनान्नत्रोधातु नासमासेन लोपे तत इनिप्रत्ययः॥ स्पृहि गृहि॥ नमूर्द्दङ्ति॥ नछुहेनस
मासोपिनिपातस्येइति वो ध्यं॥ ज्ञीङ् इति॥ अत्र मतो विध्यान्नार्थादालु च्॥ कृञाद्दिंदनापूर्वविचगमितिमाखे॥ तथा हिलु त्रूकेन्तमः
त्रापि अतोदाधेत्रिजीति दीधेस्यन्तूयालुरितिसिद्धः॥ न च लुसेसंज्ञाशंक्या॥ लुमतिद्धिष्टोयकारश्रादाविसंगोकारात॥ नवे
वंश्रज्ञालुर्नस्यात्॥ आविति द्धिताषे नोरितिवाच्यं॥ संज्ञापूर्वकोविधिरनित्य इतिद्धिताप्रवृत्तेरितिकेचित् इतिदिक्॥ जागृह् सुपल
तेन कृपालुः सिद्धइत्याकुः॥ वाधेद्भ॥ इहुडु दान्तसेरज्ञां च याणांग्रहणमित्याकुः॥ जहक्षिसत्रेमत्र तिमूपतोः सानुबंधकत्वान्नग्रहणमि
तिवा॥ तत्रकृचित्तदनुबंधकेतिकश्चित्॥ निरनुबंधकेतिवाओतेकृविन्नेतिवैषम्येकिंवीजमितिचिंतायां नकिंचिदतिगृह्णा॥ भंगु
रइति॥ कर्मकर्त्तर्येवायमसाधुरित्याकुः॥ विदुर इति॥ विदज्ञाने अस्येवग्रहणं नलाभार्थस्य॥ छिदुरमिति॥ कर्मकर्त्तरीतिहृत्तिः
नैतत्न्ना वृद्धं॥ छिदुरयादुरयाचितमिति माघप्रयोगविरुद्धत्वे विनयोः॥ जागरूकः॥ जागुरितिपंचमंतं विशिष्टनिपातनेम
वतुन्ननकुंत॥ ऊन्नरस्तूवेउकस्याननुवृत्यापन्नेरित्याद्यापेनाह॥ जागर्त्तेरिति॥ जंजपकइति॥ जपजभदहदंशभं जसपशांचुकःवा
वदूकइति॥ लूकादिव्यादग्धुः॥ माधवस्तु गर्गादौ पाठादित्याह॥ सनाशंसभिगगादौ चिजिगीषुशाक्षुपाठास्त्यासंत्ययोग्युते
नघणासंभक्षोघणुदानइतिभात॥ पाउः न्याशिरक्षापामित्यस्य ग्रहणं नऋत्यर्थस्य॥ अर्थप्रतीत्यनुरोधात विदुः॥ वेत्ते ३०

© Dharmartha Trust J&K. Digitized by eGangotri

रित्ति। अर्थानुरोधादितरेषांनग्रहणं। एवमिथिरपि इष्टार्थ एव गृह्यते। न त्विष्यतीष्माती छंदसि कात्रु काङ्क्षणो गृह्यंत इति ष्टि
ष्टिः। अत्र न मा: कित्त्वपः कार्य इति आख्यानात्। कंड्वादिपाठ विरुद्धते। तेन नतु रण्वो गिरसोन ष्टंता। सपरेमि सपर्यवः शाकुने भुरण्यु
मित्यादि सिद्धमित्याहुः। एतच्च त्रिमूर्लक्रि ष्टं वेत्तुपेस्यां उक्तप्रयोगाणामृगाद्यादित्वे भाष्युपपन्नेः। अत एव गृह्णंति ष्यन सूत्र वदे
ति भट्टपादोक्तिरपीथमेव समर्थिता मनोरमायां। सुम्रयुरिति। नच्छंदस्य पुत्रस्येति निषेधात्कथं विवेतात्वमकृत्वा वेति दीर्घश्च न। आ
गमा। लिङ्गद्वित्वसन्निदेशादेव कि नेतिसिद्धे पुनः किल्वमिच्छन्त्रृता मित्सृदंत लक्षणगुणस्य व्रतिषेधविषये आरभ्यमाणस्य बाधनार्थं
तेन न ततुर्दर्जगुरिति सिद्धं। नरते गिरन्तेश्च किकिनो गुणे निषिद्धे वक्तुं छंदसी त्युक्तं। अमथा न स्मरतु रातन स्तकृरि सेवेगुणो दुर्वी
रइति बोध्यं। इह किकि नो लिङ्वत्स्येव सूत्रमंगीकृत्ये तरत्रत्याख्यानं भाष्ये। तेन धातुमात्रात्कि किनोस्तः इति फलितं सदिः नेमि
रित्युदाहृतं। वाम्रिर्वज्रमिति। नलोके ति निषेधात्र षष्ठी। ननु लिङ्वद्भावे परस्मैपद संज्ञायां देङ्कृह्रादि प्योन स्यातां। मैवं। आदेशानां परस्मैपद सं
ज्ञा न तु लकारस्य। न च भावकर्मकर्तृषु लिड्वत्किकिनोः स्यातामिति वाच्यं। उत्सर्गयोः काप्ति दे शात्। उत्सर्गश्च तयोः कर्तरि कृदिस्येनना
सौ कवाकालाकर्तरि भवति। वर्तमानाधिकारादपि वर्तमान इति भूतकाले तमपि विरोधान्नात्तिदिश्यते। किकिनो विवादयोपि विधा
नसामर्थ्याल्लिङ्वत्तिदेशेन स्वरूपाविरोधे न कार्यातिदेशादिति बोध्यं। छांदसं सूत्रं भाषायामित्यादि वार्तिकस्य विषयविवेकाय मिहो
क्तानीगमाभावश्चेति। नीग्वतुस्तं सुधं स्विति पाय तिरित्यत्र आगमस्य नीगागमस्येत्यर्थः। अत्रैसोपि। अत्तुपपदार्थेपिमारंभस्तत्राह। भिद्यद्वि
इति। तन्नेति। तच्छीलादिषु विज्ञेष विहितेनेति भावः। बाधामाभूदिति। नवर्णस्य पलिधिनाक्विव स्यति वाच्यं। ताच्छीलिकेषु वास

रूपेण न तु जात्यादिरूपेणेति निन्दादिहिंसेत्यत्रोक्तत्वात् । किंवपि तु जात्यादौ वेति भावः ॥ अपतिहरिमिति कर्त्तरि कृदिति सूत्रानुरोधादिति
बोध्यं । यत्तु उक्तत्वात् अयं प्रयोगे तानामिति कर्मणि विग्रह उक्तः । यत्रामेदनुहोमनयानुहल्परीति करणे । तत्सर्वं दीर्घाः संप्रसारणादिवदूह्यं ग्रह
णात्तम्पमिति पवधेयं । एतेन तु हूतरित्यत्र करणस्यैककर्तृत्वविवक्षेति हरदत्तादिसंमतिः प्रत्युक्ता । भुवः संज्ञा । नच्छान्तादिषु कृत्स्वितिनिष्ठ
तेयधिकेत्यादि । तेन गंगायमुनयोरन्तरे यस्मिन् भवतीत्यत्र न । एतद्वृद्धिग्रहणानुवृत्त्या लब्धं प्रतिभूरिति नायं संज्ञायामिः यावद्द्रव्यभावि
नाहि संज्ञा । न च प्रतिभूत्वं तादृक् तस्य तात्कालिकत्वात् । तेन संज्ञात्वादेव सिद्धे तरग्रहणं व्यर्थमिति न शंकनीयमिति भावः ॥ दाम्नीत्रादाप् लु
वने । णीञ् प्रापणे । शसु हिंसायां । युञ् संयुक्तौ । द्वयोर्ग्रहणं यु मिश्रणे । युजिर् योगे । ष्टुञ् स्तुतौ । तुद व्यथने । षिञ् बंधने । सिच क्षरणे । मिह
सेचने । पत्लृ गतौ । दंश दशने । णह बंधने । ष्टुञः करणे ष्ट्रन् दन्त्रोतिनल्लोपनिर्देशो लिंगं । अकिडिमपि क्त्वि न लोपो भवतीति । अत एव तु
इन्धनादन्तात् दंशादन्तानेन इति सिद्धं । तुनो दन्तरं ष्ट्रनि मान्त्रिकनिर्देशात् ष्ट्रनि न लोपो न । नधीति । नहो धः । भित्त्वाद्दीर्घत्वं इति । एतेन ह
लसूकरयोः पुवः सुप्रपरत्वं निरस्तं । मुखमिति । तत्रैव रूढः पोत्रशब्द इति भावः । अर्त्तिलूधूसूखनसहचर इत्रः । निरनुबंधकस्य कुटादेरेव ग्रहणा
त् । ङित्त्वाद्गुणाभावे रुव । ङित्त्वाद्धु । धुवित्रमिति । उक्तो तु गुणावादेशो यो वितिमिति पाठे धूवित्रं पते । कर्त्तरि चर्षिदेवतयोः । अषिरिति देवतयो
थासंख्यं संबंधः । अषोकरणे देवतायां कर्त्तरीति व्याख्यानं । तत्र यथासंख्यमेव पुत्र पुत्र सूत्ररीत्या वेपृत्यापत्तेः तस्मान्नादकत्व
बंधे माख्यानं न्याय्यं । समवेत्ति । मामितस्यर्थः । अथो णात्यः कृ वा पाजिमि । इहोणादिप्रत्ययान्ताः सर्वे हूटि शब्दाः पेतावपवार्थश्रु
अस्तं तमप्यत्र पवार्थं पुरुकृत्यकथं विद्युत्माद्यं ते । तत्रापि कर्त्तरि कृदिति कर्तरि तेषामुत्पत्तिरोत्सर्गिकी सांशयो योग्यो संश्रदानस्त्वादिना

© Dharmartha Trust J&K. Digitized by eGangotri

कारकांतरेऽपि वा कुत्सकेन विधानात् कारिरिति शिल्पिनि रूढोयमन्यत्राप्रयोगात् कारके तु यौगिक एव कारुः शिल्पिनि कारके
निधरणिकोश्यात् यौगिकत्वे कारकत्वे योभवति तथा च भट्टिः राघवस्य ततः कार्यं कारुर्वानरपुंगव इति प्रत्ययस्वरेणोणेनाद्यंतोदा
त्तः कारुरहंतेनाभिषक् स्यादोरभक्तिर्वयमः सुमेधा इत्यादौ न तथा दर्शनात् वायविंद्रश्च सुन्वत इत्यादौ वाछिकामंत्रिकायुष्रान्ते त्वंवि
शेषः पायुरिति गुदं तस्मा पायुनेति अमरास्तुमस्यं कर्मेंद्रियविशेषे रूढोयं पालिरक्षती विग्रहे पालकोपि भुवनस्यापस्त्वनेवाऽं पायुने
इत्यत्र वेदक्ताबाधारक्षक इति व्याख्यातत्वात् उपतीति स्त्रियमिनवे जायुरिति शिलाद्रुत्यावादेनाः भेषजौषधभैषज्यान्यगदो जायुः
रित्यपीत्यमरः मायुः पित्तमित्यमरः शब्देऽपि मायुः गोमायुरेकोऽत्र उभमायुरित्यादौ भाष्ये तथोक्तत्वात् । आखिति । अश्रव्यापो । विलंबो
भावपरत्वे नपुंसकं तद्विशिष्टद्रव्यपरत्वे तु विशेष्यनिघ्नः त्रीहो नु पुंस्येव । छंदसीणः उणनुवर्तते । आयुर्नाशो मनुष्यवाची वैदिक निघं
टौ पठितः । केचित्त्वायुःशब्दमुकारांतं लोकेऽपीछंति । वायुनाऽऽयुगदायुनेति वर्णविवेक इति । तदयुक्तमिति भावः । एते णिच्चेत्युसंतः सका
रांतं लोके वेदयोः प्रसिद्ध एव । तथा च जराआयुरस्येति विग्रहे गृध्रेहत्वा जटायुषमिति प्रयुज्यते । सवितानोरासतां दीर्घमायुरिति मं
त्रे च । न त्विषयस्यमायुद्रात्तोयं । उदंतः शब्दः समस्तेऽनोदात्त एव । कथं तर्हि नेटी विंध्यस्याद्रेरभजत्तजटायोः प्रथम उ इति अभिनंद इति वेत्
पृषोदरादित्वात्संज्ञायां पाक्षिकः सलोप इति गृहाण । आयुषाशब्द आद्यंतोपप्लि । जटायुषां जटायुवविंद्यादायुं तथायुषमिति द्विरूपकोशः
तत्रायामीत्यायुरिति मृगय्वादित्वात् कुरितिनयाः तत्र । छंदसीणइति सूत्रस्य वैयर्थ्यापत्तेः स्वरे विशेषाभावाच्च । तस्मादुकारांत आयुशब्दो

© Dharmartha Trust J&K. Digitized by eGangotri

लोकेनसाधुः कोऽशोपिसूत्रविरोधेतदंशोऽप्रमाणमेवेत्यवधेयं। वाह्विति। बहुवाटुप्रियंवाक्यमितिहेमचंद्रः चाटुर्नरिप्रियोक्तिस्यादितिरत्न
मालाकोशाः नरिधुसात्यर्थः इहसूत्रेराहिंकेविसमठंति। तेनराकुरितिसिध्यति सस्येति किंशारुर्नासस्यशूकेविशिखेकंकपक्षिणीतिमेदिनी। शोर
श्चलः। उणनुवर्त्तते। नरतेः षष्ठ्यानिर्देशस्त्विदतीतिनआः तन्त्रापंचम्यानिर्देशात्सप्तम्याप्यलात्। अप्रमेतुत्रोरितिक्लिलाशृधातोरितिप्रश्लेषादियनिक्रि
लुः शाकविशेषोघटोवेतिवदंति। फर्कयादिगुर्लिगंतिकेसमरः भृगवीत्रुसमरीति। मरुमर्दनकयोरितिहेमचंद्रः मरुः कलेवरेपुंसीतिमेदि
दिनी। त्रापुरिति। अजगरेत्रापुर्वाहिसरस्तुभावित्यमरः। तरुरिति। तरंत्यनेननरकंरोपकाइतिकरणेतुः। वरुरिति। अनवस्त्राविनीतरूपपक्षे
अोदनइतिपाणिकाः। पूर्वतिनैव अोदितः प्रायणीयपयसिवरुर्भवतीत्यत्र वरुशब्देनस्थालुच्यते। उमोरन विषटोलोकप्रसिध्धास्थालीवत्स
इतिसर्वपक्षे। अदितिमोदनेनेतिवाक्यशेषस्तनोपिवल्लीमस्त्वादोदभेएववनाकेशतिरा क्षांतितं। स्थाल्यांतुउक्षणावोक्षेति। उगवादिभ्योयदितिसूत्रेतु
स्थाल्यांशाकः अोदनेभाकइतिकैयटः कोशाकुतरस्तूभपत्रशाकइत्याकुः तनुःकायत्वविस्त्रियां। त्रिष्वल्पेविरलेकृशे। धनुः पुमान्प्रियालद्रोराशि
भेदेशरासनइतिमेदिनी। धनुर्वत्राविगुणोपिनिर्गुणः किंकरिष्यतीतिधन्वंतरिः सकारांतोधनुःशब्देक्लीबपुंसोरस्ति। यथाहिविषोधनुश्चापावित
मरात्। किंनराइति। तुरंगवदनोमयुरित्यमरः। मीनातिमिनोतीत्याद्यंतुनवाकुल्लकात्। करीति। कटेवर्षावरणयोः। कटतिरसनामितिकटुः। कटुः
स्त्रीकटुरोहिण्यामित्वराराजिकयोरपि। नपुंसकमकार्येस्यात्। पुल्लिंगोरसमात्रके। त्रिषुमत्सुगंधोश्चमत्सरेपिखरेपिचेतिमेदिनी। वटतीतिवट
परिमोक्षणोवेदुर्द्विजस्तुतः सस्मृतइतिसंसारवर्त्तः दंतोष्ठ्यादिरयमितिकविकल्पद्रुमः। अणवइति। अणरणवणेत्यादिदंडकेपठितः। शाठकमीति
त्वाधुराकृउदात्तादस्तुदात्तस्यस्वरितमकृतएककृश्रान्तिः। अप्रियाप्येति। मासग्रंथावमर्यादाप्रतीतावधिबोतोगुणवचनादितिसूत्रेहरदत्तानुरोधादे
वसुकंपिवर्तंसोमंमधुइतिमंत्रेआधुरात्तदर्शनाद्वेतिभावः। त्रपुसीसमिति। त्रपुसीसकरंगयोरितिमेदिनी। हनुरिति। हनुः पुमान्यशोगराणि

© Dharmartha Trust J&K. Digitized by eGangotri

वररूक्षिकोशः। हनुर्हट्टविलासिन्यां मृत्यावस्त्रगदेस्त्रियां द्वयोः कपोलावयवइतिमेदिनी। अतित्रायनेमनुष्यन्येषामपिदृश्य
तइतिवादीर्घः। हनुमान् हनूमान्। मनुराद्दिराजोमन्त्रश्च। कंदुरिति। स्कंदत्यस्मिन्ननमापइतिमुसत्याभोगस्थानमित्याकुः
क्षीवेंवरीषंभ्राष्ट्रोनाकंदुर्नास्वेदिनीस्त्रियामित्यमरः। कंदुर्वानाइतिपूर्वेणान्वयात्पुमानित्यर्थः। मज्जोमसुमूर्वासलोपइति। श्च
तुसकारस्यलोपइत्यर्थः। अमुमागममस्क्रमित्याद्दंत्यादस्वःपरः। मकारस्यपरण्। मज्जनाभिरज्जुः। रज्जुर्वेष्टणगुणेयोषिदितिमेदिनी
आगमसकारस्यश्चुत्वेनञ्जः। जस्त्वेनजः। नञ्कुमिति। कृतीछेदने। कृत्यतेनेनेतिविग्रहः। नञ्कुरीसूत्रलातकुरितिद्वाएवलीफ
लिपाटि। एकापिषष्ठीविषयभेदाद्भिद्यते। फलेरित्यवयवषष्ठीगुणागमापेक्षया। पद्यौद्यादेशावनुष्टयेपाद्यादिम्युःस्थानषष्ठी। सा
पिधनादेशयोरलोंत्यस्येत्यस्यसमनुमञ्क्षिपतइतिवोध्यं। तथ्रत्ययोनुवर्त्तते। नमपेक्ष्यसामीप्यषष्ठ्यपि। फलवसारेऽभिधेयपवनः। वलेर्गुक
वर्क्षेति। दंतोष्ठ्यादिः। यत्तूज्ज्वलदत्तःसूत्रेपवर्गादिंपठन्नरुपाणनइत्युपमास्यते। तन्न। अयंनाभावइतिवगल्गुवोगृहइत्यादेर्दंत्योष्ठ्य
पाठस्यनिर्विवादत्वादितिन्यायः। तत्रहेदेवपुत्रावः युष्माकंगृहेगृहभूतेपतेयं। नामानामानेदिष्ठः भाषासमत्यातिवत्रामेकेदेशग्रहणं
वल्गुकल्याणंववोवदतीतिवेदभाष्येव्याख्यातं। तत्रवल्गुपूजामाधुर्ययोरितिकंड्वादिषुपठितमस्याप्रातिपदिकस्य। तो। वलिर्वितिरूपमि
त्युज्ज्वलदत्तेनवकुमस्याकामितिप्रकृते। व्याख्यादिपाठेनकिंचिद्बाधकं। कल्याणरूपार्थानुगुण्याच्च। किंवानञ्मतेउवउवीतिदंडकेपरि
नाद्वर्लेरुपत्ययमात्रविधानेनापिवलिर्वितिरूपसिद्धोगुणविधानंव्यर्थमिवल्गादिसुज्ज्वलदत्तपाठएवन्याय्यइतिवोध्यं। ञः। किन्त्वत्र

ल्यु

लो चो

© Dharmartha Trust J&K. Digitized by eGangotri

३३
32

ना। मन्वक्त्वावादभ्यासस्येत्वमाधुरान्तत्वं किंत्वादान्तोऽतोपः। शि। अर्जुर्ज्जनोर्ववक्करदद्धेरित्यक्रोसोर्द्ध्वोनात्। इदं त्ववधेयं। ञ्जः कुःस
न्वक्त्वात् इत्येवसुवचं। इतरत्सकुंत्राकं। एवं चेह किंत्वग्रहणं वग्रहणमुत्तरसूत्रे कुग्रहणं च न कर्त्तव्यमिति। उत्तरसूत्रे द्वेग्रहणात्सन्वादत्त
त्तिदेशादिरहादत्वमाधुदात्वं च न भवति किंतु प्रत्ययस्वरेणान्तोदात्तत्वमेव। अर्श्चमुत्तरसूत्रेण कुप्रत्यये द्विलेव चक्रे रेको विषुणः सूनरा
युवेति मंत्रे वक्रशब्दस्य तथात्वं दृश्यतानादितिः। इत्यादि दृत्तानीति। आधुरान्तत्वस्याप्युपलक्षणमेतत्। अर्श इति भरणेऽतस्मात्कुः। बभ्रुर्मुस्मंगर
ज्ञाति। अयं धरणिकोशः। बभ्रुर्वैश्वानरे शूलपाणौ च गरुडध्वजे। विशालेन कुले पुंसि पिंगले त्वभिधेयवदिति मेदिनी। अमतोपीति। अत्रः कु
श्चेति पठितमेशाकुपक्रूते अः प्रत्ययस्य निर्द्देशादिति भावः। पृभृदि। ड इति निवृत्तं। पुरुरिति। उदोष्ठ्यपूर्वस्येत्युत्वं। पुरुः प्राज्येऽभिधेयवत्। पुंसि
स्याद्देवलोके च नृपभेदपरागयोरिति मेदिनी। विधुरित्यादि विश्वकोशः। अत्र सूत्रे धृषिदृषि श्चेति पठित्वा धृषुः दृषुरित्युदाहरंति। अयष्टुर
ति। अयष्टुः पुंसि वाप्रे च वामे स्यादन्यलिंगक इति मेदिनी। इतरयोः स्वार्णादित्वादगयतं। अजिदृशि। इहाप्येका षष्ठी विषयभेदाद्भिद्यते। धृ
प्यः षड् ष्यः कुःस्यात्। अर्ज अर्जने। असस्रजि रादेशः। दृतोः पश्चिः। कमेस्कुगागमः। अमरोगगत्यादिषु। असप्सुगागमः। पश्चि नान्नाने
सोत्रः। असपदीर्घः। गाधृञ्जोरने। असस्प तकारादेशः। अविच्चोषेणाति। वादिगणे सम्पगर्थे पभु इति पठितं। पभुहृस्वपर्थमयमिति क्षरणिः
कं तु कंदर्पः। पांसुरिति। पदिपसिनाभ्याने। तुरादिहत्वांतः। बाकुरिति। अर्द तोपुसो वाहोऽश्व भुजयोः। पुमानिति हामोदराके। मेदिन्यां वा
हावाहश्चावंतो पुक्रूः। प्रथि प्रदि। पृथुस्यान्महति त्रिषु। भृगुः पुमान्। मुनौ हरे तटे शुक्रेऽइति मेदिन्यां। भृगुः शुक्रे प्रपाते च जमदग्नोपि
नाकिनीति कोशांतरं। लघुरिति। एकोयां स्त्री लघुः क्लीवशीघ्रे कृष्णागरुण्यपीति त्रिकांडशेषः। लघुरगुरौ च मनोज्ञे निःसारे वाच्यव

© Dharmartha Trust J&K. Digitized by eGangotri

रक्तो वं। रागो द्रुकुसुमा गहणि वष्टक्कानामो पधो द्विपामिति मेदिन्यां। वकुरिति। वकुलस्तु आदिसंख्यासु विपुले त्रलिक्षेयवदिति मेदिन्यां। उरुर्जंघे
सुज्वलदन्तः। नक्तमालु। जंघा तु प्रसृता नाम सक्थि ऊर्वि पुमानूरित्यमरेणानयोर्भेदप्रतिपादनात्। उर्णूयते। प्राच्याघ्ने ऊरुः कर्मणि प्रत्ययः। उरु
महदिति। कन्नारिकुः। पर्शुरिति। पर्शुः परशुनाम हेतिविश्वः। पशुर्हंनमिमानं वा निश्रुतिः। हरिद्रु ईक्षुरिति। दारुहरिद्राइत्येके। नद्यामिति गुडुंभा
मः। खरुः काम इति। खरुः पतिंवराकमेत्यपि। खरुर्दंते हरे दर्पे हये श्वेते तु वाच्यवदिति विश्व त्रिकाण्डशेषौ। पाठान्तरमिति। नाडिंगुरपिनालिंगुरि
ति विश्वः। लिगु विज्ञेन पुंसकमिति मरुः। विः। मृगधातुः। मृगयुः पुंसि गोमायौ व्याधे च परमेष्ठिनीति मेदिनी। प्रकृतीति। तेन पालप्रतिष्ठ
मे। प्रस्मात्कुः। पीलुर्गजे द्रुमे कांडे परमाणुप्रसूनयोरिति विश्वः। कडि भेदने। कंडरित्यादि। वाभ्रुराणाविरिति। वाभ्रुरोगार्दभइत्यमे। वार्
राजा शिनाशा श्रोरिति मेदिन्यां। वंकुरइति। वकिःसौत्रो धातुः। वंकुरःस्पंदने हृक्षेरइति मेदिनी। प्रंकुरो हाथकेरे लोम्नि पानीयेऽभिनवोद्भि
दीति च। खर्जूरेति। अंकुरोंकुरोपिचेति विश्वप्रकाशः। व्यथेः संप्र। व्यथभयसंचलनयोः। प्रस्मादुरच्यात्सं च किस्तातोः संप्रसारणं च
दशाया घातुश्च किच्चेत्ति पाठेला धकारमंत्तादेशौ विधायाविधुरोऽन ग्रिकरस्तुदाहरं। माधवो प्येवं तदयुक्तं। तमेषा विधुर इत्यवामीति त
वर्गद्वितीय पाठस्य निर्विवादत्वात्। विधुर इति तु धुरो विगत इति विग्रहे प्रादिसमासेऽकृक्पूरप्धूरिति समासांते साधुरिति हत्ति कृद्धय
दत्तनमास्थयः। वक्तृनमक्तृनस्य भुद्धयोगिकत्वेनानग्नि कृत्प्रकार बोधासंभवेन नैतद्युक्तं। तस्मादेतत्सूत्रस्थवकारस्यानुक्तसमुच्चयार्थत्वा
द्व्यधनादुनइत्यनेनउर विकिलादृहृध्ये इति संप्रसारणे विधुर शब्दः साधुः। कर्त्तृमुः श्रीणादिकानां रूढत्वादर्थासंगत्यपोगादित्य वधेया। मकुरद
रुरो। मकि मंडने। प्रस्मादुरच्चुन ढोपश्च। वाकुलकादिति। धनोहपधायाः पक्षेऽकार इतिभावः। मुकुरः स्यान्मकरवद्दर्पणेऽभूत्कुल द्रुमे। कुलालदु
दंड इति मेदिनी। मुकुरो मकुरोपि चेति विश्वश्च। द्विर्वचनमिति। गुणो द्रु गाः। मश्चाभिपात्यत इति केचित्। कुः। कर्बुर इति। कर्बुरं सलिले हेम्नि कर्बुरः

© Dharmartha Trust J&K. Digitized by eGangotri

पापरक्षसोः। कर्बुरा कृष्णकृंतायांशावलेपुनरन्यवदितिमेदिन्यां। श्वशुर इति। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोरित्यमरः। अविषइ
ति। समुद्रो राजा वा। महिषो महान्। टित्वाङीप्। महिषी राजपत्नी तु तमातमो महिषमन्वेवेरत्। लोके तु पशुविशेषे प्रसिद्धावेतौ। वलमिती ति। वैदिके
नि घंटावोरुः पाजइत्यादिवलपर्यायेषु तविषीत्यस्य पाठादिति भावः। वेदभाष्यमिति। इंद्रो वृत्रस्य तविषीमित्यादिमंत्रेष्विति भावः। किलेर्टु
किल श्वैत्यक्रीडनयोः। किल्बिषं पापरोगयोः। अपराधेपीति मेदिन्यां। इषिमदि। इषिरोऽग्निरिति। आहार इत्येके। किदिरः पावकेरजोकरवाले
परस्वधे। मंदिरमिति। इदित्वान्नलोपो न। मंदिरं नगरेऽगारे क्लीबं ना मकरालयोः। वंदिरोऽनेकपेवंद्रेः। मिहिरः सूर्यवृद्धयोः। मुहिरः कामिमूर्खयोः
बधिर इति। अनिदितामिति नलोपः। बंध बंधने। श्लि विरामिति। नाउवादिरयं दंत्यादिरप्यसि। तल्पसुषिरामिवेति। तत्रोपसुषिसुष्कमधोरइ
ति सुषिरच्छिद्रच्छिद्रवाचिनो मत्वर्थेइः प्रत्ययः। सुषिरं वंशादिवाद्यविवरे च नपुंसकं। अंब्रोणित्। णित्वादुपधावृद्धिः। आशिरो वीतिहोत्रे स्या
द्राक्षसे भास्करे पुमानिति मेदिनी। नाशिरं दुकेन तपनिधमिति मंत्रेन। आशिरमिति सवणदृतिपदकोशः तत्र वेदभाष्ये आशिरं सोममिश्र
णमोपयं पयोगावो न दुक्रेन दुहंति। आङ्पूर्वात् श्रीञ् पाके अस्मात्क्विपि अपस्पृधेथामित्यादि सूत्रेणाशिर इत्यादेश इत्युक्तं। ओणादिक
स्थित्वरेणां तोदात्तः। क्विवंते तु प्रकृतेरिकार उदात्त इति बोध्यं। आजिरशिशिर। अजेरिति। दन्त्यापादीर्घश्चोतु नञ्पूर्वस्य जीर्यतेस्म वत्सस्य ला
पोभिपात्यतेत्युक्तं। तदपि युक्तं। आशुं दूतमजिरं प्रत्नमीड्य इत्यत्र नजीर्यदित्यर्थानुगुण्यात्। अंगणमिति। अंगेर्ल्युबादेशेणत्वं वाकुल
कादित्येके। विश्वकोशादौ तु दंत्यमेवेति स्थितं। अजिरं प्रांगणे काये विषये दर्दुरेऽनिले। शिशिरो ना हिमे न स्त्री ऋतुभेदे जडे त्रिषु। खदिरश्चाक
मेदे स्त्री नाग वंडेंद्र तथा वनेपतिमेदिन्यां। श्लिपिरमिति। निवेश्लाः शिथिरं शंट मित्यर्थः। फलिलइति। सिस्रो गहनश्च। महिलाफलिनी स्त्रियामे
दिन्यां। महेलेति। नथाव दमयंती काव्ये परमहेलारतोप्यपारयायकइति। परस्य पहेला स्त्री। अंथबर्पश्माउत्केष्टा हेलाक्रीडातत्र रत इत्यर्थः

© Dharmartha Trust J&K. Digitized by eGangotri

कपिल इति कपिला रेणुकायां च शिंशपागोविशेषयोः। पुंडरीककरिण्योः स्त्री वर्णभेदे त्रिलिंगकं। नानले वासुदेवे च मुनिभेदे च
कुक्कुर इति मेदिनी। रेणुका त्विह लताविशेषः। मिथिलामथो विलोडने। अकारस्येत्वं निपात्यते। कठेर इति। कठ कृच्छ्रजीव
ने। कुठि प्रतीघाते अस्येदित्त्वान्नुम् स्यादत आह। वाकुलकेति। गुडेर इति। गुडरक्षार्थी। कुटादिः कवेरीव चू। गुपादिस्
त्रात्मभृतिरेतानि मर्मस्थानानि केषांचिदसंमतानि। कपोतः स्याच्चित्रकंठपारावतविहंगमइति मेदिनी। कपोतः पक्षिमा
त्रे इति मे त्रिकांडशेषः। अत्र विलम्बनार्ष। देवाः कपोत इत्यत्र मंत्रे प्रत्ययस्वरेणाम बोदात्तरद्रूनादितिनव्याः। कपिग
डु। कपिवलने गडुमेवचनेगडु वदनैकदेशो। कटे वर्षावरणयोः। केचित्तु सूत्रे कडिं पठंति। कडि मदे। कण्डोलः पिटक
श्चंडालश्च। चंडालिका तु कंडोलवीणा चंडालवल्लकीत्यमरः। पटोल इति। पटोलं वस्त्रभेदे नौषधौ ज्योत्स्नां तु योषितीति मेदि
न्यां। कल्लु शब्दे अस्माद्बोलच् बाहुलकात्। कल्लोलः पुंसि हर्षे स्यात् महत्सूर्मिषु वारिणाइति मेदिन्यां। स्पंदः। सिंहरसमरूभेदे सा
त्सिंहरं रक्तमूलके। सिंहरी रोचनारक्तवेद्धिका धातकीष्विति मेदिनी विश्वप्रकाशयोः सिजति। सेतुमीनो कुमारक इति मेदि
